# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

राष्ट्रे जागृयाम

संस्कृतवर्षम् युगाब्द 5101 (1999-2000)

## संस्कृतप्रसारपरिषद्

**आरा (बिहार:)**

संस्कृतप्रसारपरिषद्, आरा (बिहार:)

सरस्वती नः सुभगा मयस्करत्

**मार्च 2000**

# 'आरण्यक'स्य नियमा:

१. संस्कृतप्रसारपरिषद (आरा) इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः ( मार्च-सितम्बर ) प्रकाश्यते। वर्षारम्भः चैत्रात् मन्यते।

२. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते।

३. वार्षिकं शुल्कं त्रिंशत् रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते। शुल्कं धनादेश / ड्राफ्टमुखेन प्रेषणीयम्।

४. विमर्शात्मिका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते।

५. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।

६. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः। रचनान्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।

७. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिद्वयं सम्पादकं प्रति प्रेषणीयम्।

८. अस्वीकृता लेखा निर्धारित'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।

९. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।

१०. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।

११. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च डा० गोपबन्धुमिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम् प्रकाशपुरी, आरा ( बिहारः )-८०२३०१ इति सङ्केतेन विधेयम्।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षम् - सप्तमम् अङ्कः - प्रथमः

चैत्रः, वि० सं० २०५७

मार्च २०००

प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः - विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् — १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

परामर्शदात्री समितिः
पण्डित वासुदेव द्विवेदी, वाराणसी
डा० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा
डा० हरिहर झा, दरभङ्गा
डा० उमाशङ्कर शर्मा 'ऋषिः', पटना
डा० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डा० राय अश्विनी कुमारः, बोधगया

प्रधानसम्पादकः
पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

सम्पादकः
डा० गोपबन्धु मिश्रः

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः)
८०२३०१

संस्कृतप्रसारपरिषद्, आरा–पक्षतः डा० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गौला मुहल्ला, आरा, विहार–८०२३०१ इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।

डा० गोपबन्धु मिश्रः
सम्पादकः

# सूचीपत्रम्

| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| | सम्पादकीयम् | | |
| १ | सत्याग्रहगीताया वैशिष्ट्यम् | सीमा रानी (नेट, बेट) शोधच्छात्रा बी० कु० सिंह विश्वविद्यालयः, आरा | १ |
| २ | आख्यातार्थेषु उपग्रह-विचारः | कुमारी अपर्णा वर्मा शोधच्छात्रा बी० कु० सिंह विश्वविद्यालयः, आरा | ७ |
| ३ | धातुनिर्देशे 'इक्' प्रत्ययः (एकं चिन्तनम्) | डा० गोपबन्धु मिश्रः | १० |
| ४ | श्रीहर्षस्य नाट्यकृतिषु लौकिकप्रथा | डा० कमल कुमारी रानी अमृता च शोधच्छात्रा बी० कु० सिंह विश्वविद्यालयः, आरा | ११ |
| ५ | भरतचरितमहाकाव्ये आधुनिकरामराज्यपरिकल्पना | सुनील कुमार प्रधानः (नेट) शोधच्छात्रः बी० कु० सिंह विश्वविद्यालयः, आरा | १५ |
| ६ | पाणिनीय-'कि'प्रत्ययस्य विश्लेषणम् | डा० गोपबन्धु मिश्रः उपाचार्यः, संस्कृतविभागः बी० कु० सिंह विश्वविद्यालयः, आरा | १९ |

| | | | |
|---|---|---|---|
| ७ | विष्णोमु र्खस्य वैशिष्ट्यम् | श्री विश्वनाथ रामः<br>संस्कृतविभागशोधच्छात्रः<br>वी० कु० सिंह विश्वविद्यालयः, आरा | २५ |
| ८ | 'मरणं प्रकृतिः शरीरिणाम्'<br>( एकं चिन्तनम् ) | डा० गोपबन्धु मिश्रः | २८ |
| ९ | याचितारश्च नः सन्तु<br>( ललितनिबन्धः ) | आचार्य अम्बिकादत्त त्रिपाठी<br>'व्यासः'<br>डुमरांव, मण्डलम्-बक्सर ( विहार ) | २९ |
| १० | गङ्गाजलं दूषितम्<br>( पुस्तकसमीक्षा ) | लेखकः–डा० हरेकृष्ण शतपथी<br>समीक्षकः–<br>सुनील कुमार प्रधानः | ३३ |
| | परिशिष्टम्<br>संस्कृतसौरभसञ्चयनम्<br>तृतीयं पुष्पम्<br>'भावनाविलासशतकम्' | प्रणेता-पण्डित उपेन्द्रदत्त शर्मा<br>सम्पादकौ–<br>पं० व्रजभूषण मिश्र 'आक्रान्तः'<br>डा० गोपबन्धु मिश्रः | |


★

# सम्पादकीयम्

'गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः' इति लोकन्यायसिद्धा परिभाषा व्याकरणशास्त्रेण अनुमन्यते। सन्तकविः तुलसीदासोऽपि आह—

सेवक करा पद नयन से मुख से साहिबु होइ।
तुलसी प्रीति कि रीति सुनि सुकवि सराहहिं सोइ।

रामचरितमानस, अयोध्याकाण्ड ३०६

अर्थात्– सेवकैः करपदनयनैरिव तथा स्वामिना मुखेनेव भवितव्यम्। एतादृशं स्वामि-सेवकभावं (श्रीरामभरतयोः) कविः नितरां स्तौति।

कदाचित् विशिष्टस्य संकीर्णस्य च स्वार्थस्य कारणेन लोके करपदनयनादीनि गौणानि एव स्वसेवकत्वं परित्यज्य मुख्यं कार्यं कुर्वन्ति, तेन मुखस्य मुख्यता स्वामित्वं वा नश्यति। अनेन व्यतिक्रमेण करपदादीनां स्वकर्मप्रवृत्तिः विहन्यते, मुखस्य च नैसर्गिकी शोभा प्रतिष्ठा वा रसातलं गच्छति। एतादृशेन कर्मव्यतिहारेण युक्तो लोकः अभ्युदयरहितः अप्रतिष्ठितः पशुवत् जीवति।

एतादृशी स्थितिः इदानीं विहारप्रान्तस्य वर्तते। विशिष्टतया माध्यमिक-शिक्षाप्रसङ्गे माध्यमिकपरीक्षायां संस्कृतस्य अनिवार्यतां समाप्तुकामः विहार-सर्वकारः तद्वद् एव मुखस्य मुख्यतां नाशयति। या भाषा भारतीयसंस्कृतेः मूल आधारः, यस्याः गौरवं प्राथम्यम् अवश्यपाठ्यत्वं च सर्वे प्राच्याः पाश्चात्याश्च विद्वांसः समस्वरेण वदन्ति, यया सर्वाः हिन्द्यादयः आधुनिकभारतीयभाषाः सम्यक् पुष्यमाणाः सन्ति, तथा च यस्याः भाषायाः अध्ययनम् इदानीं माध्यमिक-परीक्षायाम् अनिवार्यमस्ति, तस्याः इदं प्रामुख्यं नाशयित्वा अपरेषाम् आङ्ग्ल-भाषासदृशानाम् अभारतीयमूलानाम् अनिवार्यतां साधितुकामा इयम् अपरिणाम-दर्शिनी बिहारसर्वकारीया व्यवस्था किं सेबकानां स्वामित्वं स्वामिनश्च सेवकत्वं साधयित्वा महान्तमनर्थं नाह्वयति ? प्राथमिक-माध्यमिकशिक्षास्तरे आङ्ग्ल-शिक्षायाः प्राधान्यं संस्कृतसंस्कृतिशिक्षायाः अनुचरत्वं च योजयन्ती मेकालेप्रणीता आङ्ग्लशिक्षानीतिः स्वातन्त्र्योत्तरे भारतेऽपि प्रबलतरा जायमानाऽस्ति।

स्वतन्त्रतायाः अर्धशतकात् उत्तरेऽपि काले इयं वैचारिकी सांस्कृतिकी च प तन्त्रता अस्माकं राजनीतिकस्वतन्त्रतायाः उपरि शासनं कुर्वतीव विराजते। अन्यथा माननीयसर्वोच्चन्यायालयपक्षतः भारतस्य संस्कृतेः आत्मपरिचयस्य च रक्षार्थं संस्कृतस्य अध्ययनम् अति आवश्यकम् इति ऐतिहासिके निर्णये भागतेऽपि, माननीयराष्ट्रपतिमहोदयतः आरभ्य प्रखण्डस्तरगतस्य कृतकनेतुः मुखात् 'संस्कृतं देवभाषा, वेदभाषा, भाषाजननी संस्कृतिमूला भाषा' इत्यादि-बहुषु भाषणेषु निःसृतेष्वपि क्रमशः सर्वेषां प्रान्तानां माध्यमिकशिक्षाव्यवस्थायां संस्कृतस्य अनिवार्यता कथं नष्टतां गच्छन्ती अस्ति ?

बिहारस्य माध्यमिकपरीक्षायां संस्कृतभाषाध्ययनम् इदानीम् अनिवार्यमस्ति, सर्वेषां स्वाभिमानरक्षायै भारतीयसंस्कृतेः परिचयार्थं च पूर्वं शिक्षानीतिनिर्धारकैः विचिन्त्यैव संस्कृतभाषाया अनिवार्यशिक्षा साधिता आसीत्। तेन च हिन्दी-मैथिली-भोजपुरी-मगही-वज्जिकादिप्रान्तीयभाषाणामपि सम्यक् पर्याप्तं च पोषणं जायमानमस्ति। परन्तु इदानीं तथाकथितम् अग्रगामिनीं (Forward) नवीनां शिक्षानीतिं प्रणेतुकामः विहारसर्वकारः सी० बी० एस० ई० पाठ्यक्रमानुसारितायाः व्याजेन आङ्ग्लभाषाया अनिवार्यतां साधयति, संस्कृतस्य अनिवार्यतां च नाशयति इति महानयं चिन्तायाः निन्दायाः च विषयः। आङ्ग्लभाषा अनिवार्या भवतु, तत्र नास्ति अस्माकं विरोधः, परन्तु संस्कृतमपि यथावत् अनिवार्यमस्तु इति स्पष्टोऽस्माकम् आशयः। विहारसर्वकारः शिक्षानीतिनिर्धारणप्रसङ्गेऽस्मिन् एतस्य अस्माकं सांस्कृतिकस्य नैतिकस्य च जीवनस्य उपरि दूरगामिनं प्रभावम् अवश्यं चिन्तयिष्यति, संस्कृतस्य स्वामित्व मुख्यत्वं वा अवश्यं रक्षिष्यतीति विश्वसिमः।

'आरण्यकम्' अस्य राष्ट्रस्य मूले संस्कृतवाङ्मये निहितानाम् अनालोचितानां विषयाणामुपरि यत् किंचित् विमष्टुं पूर्ववत् प्रवर्त्तते न वेति विदुषां दृष्टिरेव तत्र प्रमाणम्।

मार्च-2000

गोपबन्धु मिश्रः

सम्पादकः

# सत्याग्रहगीतायाः वैशिष्ट्यम्

सीमा रानी

'सत्याग्रहगीता' पण्डिताक्षमारावेण रचिता। संस्कृतवाङ्मयं स्वरचनारत्नैः पूरयिष्यमाणेषु महामनीषिषु क्षमारावः समादरेण गण्यते। 'सत्याग्रहगीता' खलु अष्टादशाध्यायात्मकं काव्यम्। महात्मागान्धिना देशस्य स्वतन्त्रतायाः कृते कृतं सत्याग्रहान्दोलनं भव्यभावपूर्णैः अनुष्टुप्श्लोकैः वर्णितमस्मिन् काव्ये। वस्तुतः इदं गान्धिमहोदयस्य चरितवर्णनमेव वर्तते।

सत्यस्य अहिंसायाश्चावलम्बनपूर्वकम् आग्रहः सत्याग्रहः इति। शस्त्रास्त्रबलहीनानां सत्याग्रहः परं बलम्। सत्याग्रहगीतायाः नायकः गान्धिमहोदयः सत्याग्रहे आस्थावान् वर्तते। स कथयति —

'अतो वस्तद्बलेनैव विरोद्धुं निश्चितं मया।
आङ्ग्लीयं हठात्कारं प्रतिरोत्स्यामि तेन च॥" (10/26)

काव्यमिदं सत्यस्य अहिंसायाश्च महत्त्वं प्रतिपादयति। सत्यं शाश्वतिकं तत्त्वम्। सर्वबलेभ्यः सत्यस्यैव बलं परम्। महात्मा गान्धी सत्यस्यास्त्रेणैव स्वराज्ययुद्धं जिगीषति।

अहिंसा परमो धर्मः' 'अहिंसयैव सिद्धिः स्यात्',

'अहिंसा निजपापघ्नी दमनी च द्विषामपि' (४/१५) इति सूक्तयः ग्रन्थेऽस्मिन् उद्घोषिताः सन्ति। अहिंसा व्यापकार्थे परिभाषिताऽस्ति सत्याग्रहगीतायाम्। न केवलं कस्यापि जीवनस्य हननमेव हिंसा अपितु मनसा अर्थात् परेषाम् अहितचिन्तनेन वाचा अर्थात् कटुवचनेन कर्मणा अर्थात् अप्रियकार्येण कस्यापि पीडनमेव हिंसा। अत एव मनसा वाचा कर्मणैव अहिंसकेन भवितव्यम्। परन्तु यत्र बलप्रयोग आवश्यको वर्तते तत्र अहिंसामाश्रित्य निन्द्यम् पलायनमशोभनम्।

"हिंसामपि समाश्रित्य वरं मृत्युमुखे गतम् ।
न पुनः स्वात्मरक्षार्थं कृतं निन्द्यं पलायनम् ॥" (4/17)

यः जनः मनसा हिंसां करोति स भीरुः वर्तते । एवं प्रकारेण सः आत्मनः मृत्युभयात् आत्महिंसां करोति ।

गीतायां भगवता कृष्णेनोपदिष्टम्—

'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।'

एतमेवाश्रित्य 'सत्याग्रहगीताया'मपि भणितम्—

स्वधर्मो परमो धर्मो न त्याज्योऽयं विपद्यपि ।'

प्राणांस्त्यक्त्वापि धर्मरक्षा करणीया । याः प्रजा राजा वा धर्माचरणं कुर्वन्ति तेषामुन्नतिः भवति । एतद्विपरीतं ये धर्माचरणं न कुर्वन्ति ते अवश्यमेव नश्यन्ति ।

काव्यमिदं गीता इव अस्मान् कर्म प्रति अभिप्रेरयति । एतत् 'सत्याग्रह-गीता' इति स्वनाम सार्थकं करोति । अस्य नायकः एव कर्मयोगी वर्तते । सः प्रबोधयति—

"उत्तिष्ठत ततः शीघ्रं तान्तवे कुरुतोद्यमम् ।
पटकारो जनो येन प्रतिपद्येत तत्फलम् ॥" (1/38)

भारतीयजनेषु देशभक्तिभावं भरितुमनुपमं वर्तते काव्यमिदम् । परतन्त्रस्य देशस्याभ्युदयो न भवति । अतः स्वराज्यप्राप्त्यर्थं जनैः प्रयतितव्यम् इति पदे-पदे समुपदिष्टम् । अधस्तने पद्ये विश्वजनीनं सत्यमुद्घाटितम् —

"जीवन्नोऽपि न जीवन्ति परदास्यधुरन्धराः ।
पारतन्त्र्यमुदाराणां मरणादतिरिच्यते ॥" (1/36)

पराधीनजनस्य स्थितिः काकस्य इव भवति—

'दासभावे स्थितैः कष्टं सोढव्यमतिदुस्सहम् ।
दासोऽश्नाति स्वकं खाद्यं काकशङ्की पदे-पदे ॥" (1/37)

अद्यत्वे वयं भारतदेशीयाः लोभाविष्टाः ईर्ष्यया असूयया च ग्रस्ताः स्मः । वयं भाषाभेदं, सम्प्रदायभेदं, जातिभेद, प्रदेशभेदादिकमवलम्ब्य परस्परं कलहायामहे । काव्यमिदम् अस्माकम् एतान् सर्वान् कलुषान् प्रक्षालयितुं क्षमं वर्तते । एतेन राष्ट्रीगभावना हृदये संचरति । अस्पृश्यतायाः भावना



अपसरति । सर्वान् जनान् प्रति बन्धुतायाः भावना बलवती भवति । देशभक्तिः जागर्ति । न कोऽपि उच्चः न कोऽपि नीचः, इति भावो मनसि दृढीभवति । इदं स्वदेशीयान् प्रति सौहार्दस्य स्नेहस्य सौख्यस्य च मन्दाकिनीं प्रवाहयति । किञ्चिदुदाहरणम् —

"शूद्रो वा ब्राह्मणो वापि क्षत्रियो वा कृषीबलाः ।
देवदृष्ट्या समाः सर्वे विकृतिस्तु नरोद्भवा ॥" (2/19)

"धनाढ्या वा दरिद्रा वा समाः सर्वे परस्परम् ।
अतः स्वार्थं परित्यज्य वर्तध्वं धर्मतत्पराः ॥" (2/27)

अपि च,

भेदः कृतो मनुष्येण न धात्रा समदर्शिना ।
शीलं चिह्नं सुजातस्य न जातिर्न च जीविका ॥ (2/20)

अन्यच्च,

"बहिष्कारोऽन्त्यजानां हि भारतस्यैव लाञ्छनम् ।" (2/18)

काव्ये एकतायाः महत्त्वं प्रतिपादितम् । धर्मभेदमाश्रित्य विवादो न करणीय इति संदिशति श्लोकोऽयम्—

"यथा यथा प्रजामध्ये जायते भिन्नधर्मतः ।
द्वेषस्तथा तथोत्कर्षो देशस्य परिहीयते ॥" (7/3)

राजनीतिविषयक-तथ्यानि साङ्गोपाङ्गं वर्णितानि काव्येऽस्मिन्, यानि क्षमारावस्य राजनीतिज्ञानस्य परिचायकानि सन्ति ।

शासकैः प्रजानां मनोवृत्तिः अवश्यमेव ज्ञेया । अन्यथा अज्ञानात् द्वैधं भवति । द्वैधात् शत्रुता, शत्रुत्वाद्विप्लवो भवति । विप्लवात् शासकस्य नाशः भवति ।

पद्येऽस्मिन् राजनीतेः अमूल्यं तथ्यं वर्णितम् —

"महान्ति सैन्यवृन्दानि ग्रसन्ते देशसम्पदम् ।
अतः कार्यश्चमूह्रासः शासकार्थक्षतावपि ॥" (10/2)

'सत्याग्रहगीतायाः' काव्यसौष्ठवमपि अतिविशिष्टम् । चारुत्वस्य न्यौन्यं कुत्रापि नावलोक्यते । भाषा प्राञ्जला, भावानुकूला प्रवाहमयी च । भाषायाः

भावस्य च मणिकाञ्चनसंयोगो दृश्यते। प्रसादगुणसम्पन्ना वाणी काव्ये कमनीयतामादधाति।

चचार, चकार, पप्रच्छ, ययुः, प्रपेदिरे, बभाषिरे, तस्थुः प्रापुः – इत्यादयः लिट्लकारस्य प्रयोगाः भाषायाः सौन्दर्यं द्विगुणं करोति।

तितिक्षा, मुमुक्षा, दिदृक्षुभिः, जिहीर्षया, चिकीर्षया, रुरुत्सया – इत्यादिषु सन्नन्तप्रयोगेषु क्षमारावस्य व्याकरणे पाण्डित्य प्रकटीभवति।

त्रिशदुत्तरनवशताधिकसहस्रसङ्ख्यायै (१९३०) खवह्निनग्रहचन्द्राब्द'—

इत्यस्य प्रयोगे तस्याः वर्णनचातुरी विलसति। क्षमारावस्य शब्दकोशोऽपरिमितः। एकस्यैव शब्दस्यानेके पर्यायाः दृश्यन्ते। तद्यथा समूहवाचिनः अनेके शब्दाः—

कदम्बः वृन्दः ओघः व्यूहः तोमादयः। स्त्रीवाचिनः योषितः, प्रमदा, नारी, अङ्गना, महिलादयः। एवं प्रकारेण शीघ्रतावाचिन सत्वरम्, त्वरितम्, अञ्जसादयः।

अलङ्काराः अपि अवसरानुकूलाः प्रयुक्ताः। अनुप्रासस्य चाकचिक्यं पदे पदे समुपलभ्यते।अनप्रासस्य मनोहारि रूपं द्रष्टव्यं पद्येऽस्मिन्—

"ध्यायं ध्यायं दशां दीनां बन्धूनां दुःखितोऽभवत्।
तदुद्धारमनुध्यायन् विनिद्रोऽगमयन्निशाम् ॥" (2/11)

कतिपयेषु पद्येषु मनोरमा तुकात्मकता दृश्यते।

तद्यथा—

"यदृच्छया जले प्राप्ते वस्त्रस्यार्धं प्रमार्जये।
शुष्केण वेष्टिता तेन शिष्टमर्धं च धावये॥" (2/6)

अपि च,

लुप्तधर्मैः किलास्माभिरस्पृश्या इति दूषिताः।
निष्कासिताश्च संसर्गादन्त्यजा भयकम्पिताः॥" (2/15)

उपमायाः छटा दृश्यते श्लोकेऽस्मिन्—

पदे पदेऽधिकारो नो विच्छिन्नः परतस्करैः।
येन व्यक्तित्वहीनाः स्मो हृतपक्षाः खगा इव॥ (2/35)



उपमायाः अपरो दृष्टान्तः। सद्गुणैर्युक्तः महात्मा ताराभिर्युक्तं गगनमिव सुशोभते—

असङ्ख्यैरद्भुतालोकैः सद्गुणैर्धर्मसञ्चितैः।
विराजते महात्मासौ ताराभिर्गगनं यथा॥ (4/11)

काव्येऽस्मिन् पदे-पदे सूक्तयः समुपन्यस्ताः याः क्षमारावस्य व्यावहारिकज्ञानम्, अनुभवप्रौढ़ताञ्च प्रदर्शयन्त्यः सचेतसां चित्तं चमत्कुर्वन्ति। तद्यथा—

'स्वातन्त्र्याद्धि मनुष्याणां प्रियमन्यन्न विद्यते।' (1/34)
'किं हि कार्यं प्रभुत्वेन विमुखेन प्रजाहितात्।' 10/6)
'स्वामिनः परमो धर्मः प्रजानां हितकारिता।' (10/8)
'सकृदेव हि नश्यति न पुनर्द्धिः शरीरिणः।'
'तृषयापि वरं मृत्युर्न तु पानमरेः करात्।'
'रोगिणामनिवार्या हि चिकित्सा न त्वरोगिणाम्।' (13/36)
'ऐक्यं स्वातन्त्र्यसाधनम्।'
'जीवनं न तु दासस्य देशद्रोहविधायिनः।' (17/60)

अतिरोचकाः एतासां सूक्तयः यासु जीवनस्य गूढ़तथ्यानि निहितानि सन्ति।

क्षमारावस्य चरित्रचित्रणमपि विलक्षणम्। नायकः महात्मा गान्धी सर्वेषां सद्गुणानाम् आकरः वर्तते। सः वीतरागी, जितक्रोधी सत्याहिंसाव्रतो, स्थिरप्रज्ञः, नित्यसत्त्वस्थः वर्तते।

अस्य गुणान् वर्णयन्ती सा कथयति—

"निर्ममो नित्यसत्त्वस्थो मिताशी सुस्मिताननः।
सुकलत्रः शिशुप्रेमी पितेवाश्रमवासिनाम्॥" (4/5)

गणपुत्रस्य देशस्य स्वतन्त्रतायाः कृते आत्मोत्सर्गः अनुकरणीयः। सः शिक्षयति—

"किं धनैरसुभिः किं वा स्वदेशार्थमनर्पितैः।
इतीव शासितुं लोकान् स युवा जीवितं जहौ॥" (16/26)

एवं प्रकारेण 'सत्याग्रहगीता' भारतीयगौरवस्य, संस्कृतभाषावैशिष्ट्यस्य, उत्कृष्टकवित्वशक्तेः निदर्शनं वर्तते ।

अस्मिन् प्रतिभायाः प्रौढ़ता, कल्पनायाः सूक्ष्मता, अनुभवस्य गहनता, अभिव्यक्तेः स्पष्टता, भावानां रमणीयता, धर्मस्य महत्ता, आदर्शस्य स्थापना, शिवस्य भावना च निहिताः सन्ति ।



# आख्यातार्थेषु उपग्रह-विचारः

कुमारी अपर्णा वर्मा

संस्कृतभाषायां सुबन्त-तिङन्तरूपेण मुख्यतः सार्थकं पदद्वयं स्वीकृतमस्ति । तत्रैव वाच्यार्थख्यापनं भवति, न तु निपातोपसर्गयोः । एतएव निपाताः उपसर्गाश्च द्योतकाः मन्यन्ते न तु वाचकाः इति वैयाकरणमतम् । सुबन्त-तिङन्तयोरपि तिङन्तस्य प्रधानत्वं प्रकल्पितम् । 'एकतिङ् वाक्यम्' इति कात्यायनस्य वार्तिकम् । किं च निरुक्तकारो यास्कोऽपि कथयति–'तद् यत्रोभे भावप्रधाने भवत.' । अर्थात् वाक्ये नाम चाख्यातं च प्रयुज्यमानमपि भावप्रधानस्य आख्यातस्य मुख्यत्वं भवति । तिङन्तरूपस्य आख्यातस्य एव साधनतया सुबन्तमुपयुक्तं भवति इति स्थितिः ।

आख्यातस्य अर्थेषु कालः, साधनं, संख्या. पुरुषः, क्रिया (व्यापारः) उपग्रहश्चेति षडेव परिकीर्तिताः वैयाकरणैः । तत्र कालः वर्त्तमानादिः लकारद्योत्यः, साधनं कारकं भवति क्रियानिष्पत्तिसहायकं कर्त्रादि । एवं सख्या वचनमिति कथ्यते एकत्वादि । पुरुषः प्रथमादिः वाक्यविषयादिः । व्यापारः उपक्रमप्रभृति अपवर्गपर्यन्तः क्रमरूपः । तथा च भर्तृहरिः कथयति —

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।<br>
आश्रितक्रमरूपत्वात् तत् क्रियेत्यभिधीयते ॥

सत्स्वपि एतावत्सु अर्थजातेषु उपग्रहस्य स्थानमपि नावकृष्टम् । क्रियायाः सम्पादने प्रायः जिज्ञासा जायते यत् फलान्विता क्रिया यदि भवति तदा तस्याः फलं को धारयति ? किं क्रियाफलं कर्तृनिष्ठं वर्तते अथवा अन्यनिष्ठम् ? कर्त्ता यदि स्वयं क्रियाफललाभाय प्रयत्नवान् तदा स्थितिः भिन्ना भवति । यदि च स फलस्य परगामित्वं वाञ्छति तदा अपरा स्थितिर्जायते । अत्रैव उपग्रहस्य दर्शनं प्रवर्त्तते । उपग्रहस्य प्रकाशनस् आत्मनेपद—परस्मैपदप्रत्यययोः

भवति । सामन्यतः आत्मनेपदशब्देन इदमेवाभिधीयते यत् क्रियाफलम् आत्मने अर्थात् स्वोपभोगाय जायते । परस्मैपदशब्देन तिङन्तं पदं परभोगार्थं भवति इति भावो व्यज्यते ।

वस्तुतः केषाञ्चन धातूनां स्थितिरीदृशी भवति यत् तिप्तस्झि-प्रभृतयः नव प्रत्ययाः परस्मैपदसंज्ञकाः क्रियायाः फलस्य अकर्तृगामित्वं बाधयन्ति । यथा—'पठति' इति प्रयोगे उच्चैः स्वरेण उच्चारणं परान् श्रावयितुमिति बोधः भवति । किन्तु 'शेते' इति आख्यातोच्चारणे क्रियायाः फलं क्लान्तिनिवारणरूपं कर्तृनिष्ठमेव बुध्यते । यदि च तत्र प्रेरणार्थकक्रियायां 'शाययति' इति प्रयोगः, तदा कर्तृगामित्वं फलस्य प्रतिपादयिषितम् । अपरस्मै फलं दातुमेव शयनप्रेरणा-प्रदानं भवति इति तात्पर्यम् ।

परमेषा स्थितिः सम्प्रति संस्कृतभाषायां लुप्तप्रायैव वर्तते । आत्मनेपद-परस्मैपदप्रत्ययाः धातुषु रूढा एवाभवन् । तथा च पाणिनिः धातुपाठे धातोः कीदृशः प्रत्ययः आत्मनेपदसंज्ञकः परस्मैपदसंज्ञको वा इति नियमान् स्वकाले प्रचलितप्रयोगदृष्ट्या निरूपयति । अपि च यत्र धातोः उभयपदत्वं तत्रैव कर्तृगामित्वम् अकर्तृगामित्वं वा क्रियाफलस्य इति स्थितिः । यथा 'डुकृञ् करणे' इति उपदिष्टे सति ञित्त्वात् उभयपदत्वम् अर्थानुसारेण संभवति । 'कटं करोति' इति प्रयोगे परस्य उपभोगाय कट-करणप्रवृत्तिः, 'कटं कुरुते' इत्यत्र तु आत्मोपभोगाय कट-करणस्य प्रयास इति अर्थभेदः ।

एवम् उपग्रहस्य प्राचीनसंस्कृतभाषायां संज्ञानुसारेण प्रवृत्तिभेदः अभवत्, स च क्रमशो विनष्टः । तस्य च संकेताः ग्रीकलैटिनादिषु देशान्तरभाषासु उपलभ्यन्ते । क्वचित् पदं रूढिमापन्नम्, क्वचित् च अर्थानुबन्धि इति आत्मनेपद—परस्मैपदरहस्यम् ।

भगवान् पाणिनिः संस्कृतभाषां व्यापकतया समीक्षमाणः क्वचिदर्थविशेषेण क्वचिच्चोपसर्गविशेषनिवेशेन पदव्यत्ययं नियमयति इति तस्य सूक्ष्मेक्षिका विस्मयमातनोति । यथा—'स्था' धातोः परस्मैपदत्वेऽपि भावप्रकाशने अवस्थितिश्चेत् 'गोपी कृष्णाय तिष्ठते' इत्यादौ अर्थविशेषे आत्मनेपदत्वम्, यथा वा 'समवप्रविभ्यः स्थः' इति उपसर्ग-विशेषेषु सत्सु आत्मनेपदत्वम्—संतिष्ठते,



अवतिष्ठते, प्रतिष्ठते इत्यादि । किञ्च रम्-धातोः आत्मनेपदत्वेऽपि उपसर्ग-विशेषेषु प्रयुक्तेषु परस्मैपदत्वम् आरमति, विरमति इत्यादि ।

संस्कृतभाषायाः विकासक्रमेण क्रियायाः तात्कालिकं फलं पर्यवसितं च फलम् अधिष्ठानतया व्यत्ययमापन्नम् । तस्यां स्थितौ आत्मनेपरस्मैपदनियमाः क्रमशः शैथिल्यं गताः । कालक्रमेण यथा सुबन्तपदेषु लिङ्गं शब्दसंस्कारमात्र-भवस्थितं न तु वास्तविकम्, तथैव क्रियापदेषु (तिङन्तेषु) उपग्रहः शब्दसंस्कारमात्रं रूढिगतं वाऽवस्थितमिति दिक् ।

# धातुनिर्देशे 'इक्'प्रत्ययः

गोपबन्धुः

अष्टाध्याय्यां धातून् निर्देष्टुकामेन सूत्रकारेण पाणिनिना केचित् उपाया आचरिताः सन्ति । ते च—

1. साक्षात् धातुः, यथा—करणे हनः ('हन्'धातुः), यावति विन्दजीवोः (विन्द्, जीव्धातू), भुवश्च ('भू'धातुः)
2. 'ति'सहितः धातुः, यथा—भवतेरः (भवति='भू'धातुः), एतिस्तु० (एति='इ' धातुः), प्रजने सर्तेः (सर्ति='सृ' धातुः)
3. 'इ'सहितः धातुः, यथा—अजिव्रज्योश्च (अज्-व्रज्धातू), मिदेर्गुणः ('मिद्' धातुः)

अत्र साक्षात् धातूनां प्रयोगे 'हन्-आदिधातूनां प्रातिपदिकत्वेन व्यवहारकाले कश्चित् वैयाकरण उपायो नापेक्षितः, हन्-हनौ-हनः, भूः भुवौ भुवः इत्यादिसुबन्तानां सिद्धेः । परन्तु शिष्टस्य द्वयस्य धातुनिर्देशस्य प्रसङ्गे वार्त्तिककारेण 'इक्श्तिपौ धातुनिर्देशे' (वा० ३. ३. १०८) इति वार्त्तिकं प्रणीतम् । एतेन धातुनिर्देश-प्रसङ्गे इक् च श्तिप् चेति कृत्प्रत्ययद्वयं कल्पितम् ।

तत्र इक् इति कानुबन्धं प्रत्ययं कथम् उपदिशति वार्त्तिककारः, कथं न पुनः केवलम् 'इ' अथवा इच्, इत् इति भिन्नानुबन्धसहितम् 'इ'प्रत्ययम् ? वस्तुतः एषः प्रत्ययः आर्धधातुकसंज्ञकः भवति । अस्य कित्त्वाभावे अजि (अज्+इ), व्रज् (व्रज्+इ) इत्यादौ तु बाधा नास्ति, परन्तु मिदि (मिद्+इ), मृजि (मृज्+इ) इत्यादौ 'पुगन्तलघू', इति उपधागुणे सति मेदि, मर्जि इत्यादि अनिष्टापत्तिः भवेत् । अनेन कित्त्वेन तु 'क्ङिति च' इति सूत्रेण गुणो निषिध्यते ।

अग्रजन्मनः पाणिनेः इच्छां व्यवस्थां चानुसृत्य अनुजः कात्यायनः प्रवर्त्तते इति शास्त्रेष्वपि एतादृशं शिष्टपरम्परानिर्वहणं किम् अस्मान् स्वजीवने एतदनु-रूपमाचरितुं न प्रेरयति ?

★



# श्रीहर्षस्य नाट्यकृतिषु लौकिकप्रथाः

डा० कमल कुमारी

तथा च

रानी अमृता

श्रीहर्षस्य प्रियदर्शिका-रत्नावली-नागानन्द-इत्याख्याः अखिलाः तिस्रः नाट्यकृतयः शृङ्गाररसप्रधानाः वीररसानुप्राणिताश्च सन्ति । परन्तु एतेषु रूपकेषु कार्यावस्थानां पात्रगतसंवादादीनां च विषये केवलं रससिद्ध्येकप्रवणता न लक्ष्यते । अपि तु तत्र सहजतया लोकजीवनस्य स्वरूपं लोकगतानां विविधानां प्रथानां मान्यतानाञ्च चित्रणं परिदृश्यते । सामान्यतया समाजस्य अधिसंख्यं जनैः दीर्घकालं यावत् यः आचारः अनुस्रियते सः 'प्रथा' रूपेण अभिमन्यते । 'समनर' महोदय आह—'सुपरिभाषितः लोकाचारः एव 'प्रथा' अस्ति ।'[1] लौकिको मानदण्डः मान्यता इति कथ्यते । तर्कस्य विज्ञानस्य च दृष्ट्या सिद्धः माऽस्तु तथापि सः व्यक्तिं परिवारं समाजं च सञ्चालयति ।

सतीप्रथा—पतिपत्न्योः अविच्छेद्यं सम्बन्धं साधयितुं प्रचलिता सामाजिकी प्रथा 'सतीप्रथा' कथ्यते स्म । अस्यां प्रथायां पत्युः मरणात् तस्यैव चितायां पत्नी आत्मानं दग्ध्वा पतिसहगामिनी भवति । परन्तु एतस्य विलोमः (पत्न्याः चितायां पत्युः प्राणत्यागः) न दृश्यते (एतत् समाजस्य क्रूरं पुरुषप्रधानत्वं द्योतयति) ।

श्रीहर्षस्य नागानन्दे मलयवत्याः विशिष्टदशावर्णनेन सतीप्रथायाः प्रचलनं परिलक्ष्यते । नाटकस्यास्य पञ्चमेऽङ्के यदा रक्तरञ्जितः 'जीमूतवाहनस्य चूडामणिः तस्य पितुः पादयोः अपतत् तदा मलयवती क्रन्दन्ती सती पत्युः चूडामणिम् अयाचत, येन सा स्वकीयां हृदयज्वालाम् अपाकुर्यात् ।[2] प्रियदर्शि-कायां प्रथमेऽङ्के उल्लिखितमस्ति यत् यदा विन्ध्यकेतोः वधः भवति तदा तस्य

सहधर्मिण्यः रमण्यः सतीत्वमाप्नुवन्ति ।[3] अपरे च स्थले पुण्डरीकस्य मृत्युं परिज्ञाय महाश्वेता स्वसख्याः तरलिकायाः समक्षं सतीत्वमभिगन्तुम् उद्युक्ता ।

वृक्षपूजा—भारतवर्षे हिन्दुधर्मान्तर्गते पीपल-तुलसीत्याख्ययोः वृक्षयोः देवानां निवासो मन्यते । अशोकवृक्षोऽपि पवित्रतमः । लोकमान्यतया पुत्रप्राप्त्यर्थं नार्यः अशोकवृक्षम् उपासन्ते । रत्नावल्याम् अशोकवृक्षस्य उपासनायाः वर्णनं प्राप्यते । एषा उपासना मदनोत्सवे क्रियते स्म । महिषी वासवदत्ता सखीभिः सह मकरन्दोद्यानमगच्छत् तथा च काञ्चनमाला अशोक-वृक्षस्य मूले कामदेवं प्रतिष्ठापितवती । ततश्च वासवदत्ता 'रक्ताशोकवृक्षं' निजकरैः कुसुम-कुङ्कुम-चन्दनैः विभूषयति । आदौ सा अशोकवृक्षं पूजयति पुनश्च कामदेवम् अभ्यर्चयति ।[4]

वसन्तमहोत्सवः—वस्तुतः वसन्तः प्रकृतेः उल्लासस्य पर्व । अस्मिन् ऋतौ सर्वेषां मनसि आनन्दशतदलं प्रस्फुटति । वसन्ते उत्सवानामेका सुदीर्घश्रृङ्खला प्रचलिता भवति । यथा–कामदेवायतनयात्रा, सुवसन्तक, पुष्पचयन, मदनोत्सव, उदकक्ष्वेडिका, आम्रभञ्जिका, अशोकान्तसिका, शाल्मलीविनोद, अभ्यूषखाद-निका, नवाम्रखादनिकादयः । श्रीहर्षस्य नाटिकायां रत्नावल्याम् ऋतुसम्बन्ध्यु-त्सवेषु वसन्तोत्सवः मुख्यः । कौशाम्ब्याः नगर्याः वसन्तोत्सवस्य वर्णनक्रमे उल्लिखितमस्ति यत् जनः उत्सवानुरूपं वस्त्राणि धारयन्ति । एषः उत्सवः चैत्रमासे आयोज्यते स्म । अस्मिन्नेवावसरे रमण्यः होलिकामाचरन्ति स्म ।[5] मदनोत्सवं वर्णयन् कविः रमणीनां विविधाङ्गभावहासविलासानां विलक्षणं स्वरूपं दर्शितवान् ।[6]

करुणविलापः—इह लोके कश्चिदपि आत्मीयः पञ्चत्वं गच्छति, परिवेशः विषादविषण्णः भवति । सर्वत्र क्रन्दनमेव श्रूयते । नागानन्दनाटके पञ्चत्वे गते जीमूतवाहने तस्य वृद्धः पिता जीमूतकेतुः, विलपति—

निराधारं धैर्यं कमिव शरणं यातु विनयः,
क्षमः क्षान्तिं वोढुं क इह ? विरता दानपरता ।
इदं सत्यं नूनं व्रजतु कृपणा क्वाद्य करुणा
जगज्जातं शून्यं त्वयि तनय लोकान्तरगते ॥[7]



प्रियदर्शिकायामपि बन्धुबान्धवयुक्ते विन्ध्यकेतोः निधने सति तस्य गृहे 'हा तात ! क्व गतः' इति विलपन्त्या बालिकायाः करुणक्रन्दनं श्रूयते ।[8]

शकुनानि—शुभानि अशुभानि च शकुनानि कार्ये सफलतां बाधां वा सूचयन्ति । नागानन्दे जीमूतवाहनस्य पितुः वामनेत्रं स्फुरति, अतः अशुभम् आशङ्क्य जीमूतकेतुः गदति–'धिक् त्वां वामनेत्रं वारवारम् अशुभानि सूचयत् कथं स्फुरति ? मा स्फुर । मम बालः (जीमूतवाहनः) सकुशली स्यादिति ।" नागानन्दे एव यदा जीमूतवाहनः वसन्तकश्च मलयपर्वतम् अगच्छतां तदा तस्य दक्षिणनेत्रं स्फुरति यत् शुभसङ्केतः विद्यते ।[10]

ज्योतिर्विद्यायां विश्वासः—लोके ज्योतिषशास्त्रेणैव सर्वाणि माङ्गलिक-कार्याणि सम्पादितानि भवन्ति । श्रीहर्षस्य रूपकेष्वपि विवाहादिकेषु ज्योति-र्विद्यायाः प्रभावः परिलक्ष्यते । नागानन्दनाटके मलयवत्याः विवाहः कृत्यरात्रौ प्रथमप्रहरे अभूत् ।[11] एतत् विबाहार्थं शुभलग्नम् । ज्योतिषस्य भविष्यवाण्याऽनु-प्राणितः सन् यौगन्धरायणः राज्ञः उदयनस्य विवाहः रत्नावल्या सह यथा भवेत् तथा सः नितरां प्रयतते । वस्तुतः भविष्यवाणी आसीत् यत् येन सह रत्नावल्या विवाहः भविष्यति स चक्रवर्ती भविष्यतीति ।[12]

दैवाश्रयणम्—रत्नावल्यां स्पष्टनिर्देशोऽस्ति यत् मानवैः दैवाश्रयिभिः भवितव्यम् । प्रथमेऽङ्के प्रस्तावनायामेव सूत्रधारः कथयति यत् भाग्यः विदूरादपि अन्यस्मात् द्वीपात् सागरमध्यतः अपि अभिलषितं जनं पदार्थञ्च) शीघ्रमेव प्रापयति ।[13] यद् भावि तद् भविष्यति एवेति अत्राशयः । अस्यां नाटिकायां प्रायशः 'दिष्ट्या वर्धसे' इत्यस्य प्रयोगो वर्तते ।

प्रेतात्मनः अस्तित्वम्—रत्नावल्यां वर्णितः प्रेतात्मनः विषयः प्रमाणी-करोति यत् तदानीन्तने लोकजीवने प्रेतात्मनः अस्तित्वं स्वीकृतमासीत् तथा च जनाः प्रेतात्मनः बिभ्यति । 'सागरिका'ख्या चटका यदा बकुलबृक्षे कूजति तदा विदूषकेण एषः प्रेतात्मनः ध्वनिरिति मतः । भीतः सन् विदूषकः पलायनार्थमपि यतते ।[14]

त्रिलोकस्य मान्यता यथाद्यतनकाले त्रिषु लोकेषु जनानां विश्वासः तथैव रत्नावल्यां वर्णनं विद्यते यत् स्वर्गलोके देवताः पृथ्वीलोके मनुजाः तथा च पाताललोके नागाः निवसन्ति ।[15]

खगाः मानवभाषाभाषिणः—रत्नावल्याम् उल्लेखः अस्ति यत् 'सारिकामेधाविनी' इत्याख्या चटका चतुर्वेदिनः ब्रह्मणा इव वेदोच्चारणमकरोत्।[16] तदानीं लक्ष्यते यत् खगाः मानवभाषाः वदन्ति स्म अवगच्छन्ति स्म चापि। मानवाः अपि खगानां भाषा अवगच्छन्ति स्म।

उपर्युक्तैः तथ्यैः स्पष्टमेतत् यत् तदानीन्तनाः प्रथाः मान्यताश्च अधुनापि स्वीक्रियन्ते। समासतः श्रीहर्षस्य नाट्यकृतिषु चित्रिताः प्रथाः मान्यताश्च सार्वभिकं प्रासङ्गिकञ्चास्ति।

## सन्दर्भसूची

* संस्कृतविभागाध्यक्षा, म० म० महिला महाविद्यालयः, आरा।


1. जी० के० अग्रवाल, समाजशास्त्र पृ० १८४
2. नागानन्दम्, अङ्कः ५, पृ० २१६
3. प्रियदर्शिका, अङ्कः १, पृ० १६, 'एवं सबन्धुपरिवारे हते विन्ध्यकेतौ, तमनुसृतासु सहधर्मचारिणीषु'
4. रत्नावली, अङ्कः १, पृ० ८२
5. रत्नावली, अङ्कः १ पृ० ४१
6. रत्नावली, अङ्कः १, पृ० ४५
7. नागानन्दम् ५/३१
8. प्रियदर्शिका, अङ्कः १, पृ० १६
9. नागानन्दम् ५/४
10. नागानन्दम्, १/१० दक्षिणाक्षिस्पदनं ——किञ्चिदम्।
11. नागानन्दम्, अङ्कः ३, पृ० १०८
12. रत्नावली, अङ्कः ४, पृ० ३२६
13. रत्नावली, १/६
14. रत्नावली, अङ्कः २, पृ० १३८
15. रत्नावली अङ्कः २, पृ० १३६, अङ्कः ४, पृ० २९५, २९६
16. रत्नावली, अङ्कः २, पृ० १४६




### भरतचरितमहाकाव्ये

# आधुनिकरामराज्यपरिकल्पना

सुनील कुमार प्रधानः

संस्कृतप्रसारपरिषदा सद्यः प्रकाशिते 'भरतचरित'महाकाव्ये रामानुजस्य कैकेयीसुतस्य भरतस्योदात्तमनुपमं च चरितं वर्णितमस्ति। अस्य महाकाव्यस्य रचनाकालः ईस्वीय १९७५ तः १९८० यावदस्ति। काव्येऽस्मिन् पञ्चदश सर्गाः सन्ति। इह हि बहुविधानां छन्दसां प्रयोगः विद्यते। कविः प्रसादगुणोपेतां वैदर्भीरीतिमवलम्ब्य महाकाव्यमिदं रचयामास। निखिलेऽस्मिन् महाकाव्ये सर्वत्र भाषा सरला मधुरपदविन्यासललिता च। रचयिता खलु पण्डित-भवानीदत्तशर्मा बहुविधोपाधिसहितः अनन्यसाधारणप्रतिभासम्पन्नश्चासीत्। कवेः जन्मस्थानं भोजपुरमण्डलान्तर्गतः ज्ञानपुराभिधः ग्रामोऽस्ति। तस्य गद्य-पद्य-व्याकरणादिषु विषयेषु अप्रतिहतगतिः आसीत्। महाकविना विरचितेषु ग्रन्थेषु 'भरतचरितम्' अत्युत्तमम्। महाकाव्येऽस्मिन् कविना आधुनिकरामराज्यपरि-कल्पना सम्यग् निर्दिष्टा।[1]

कवेः आधुनिकरामराज्यकल्पनायाः पूर्वं रामराज्यस्य स्वरूपस्य चित्रणम् अपेक्षितमित्यतः आदौ रामराज्यस्य चित्रणं क्रियते। रामः प्रकृतीरनुरञ्जयन् योगक्षेमं वितन्वानः वसुधातलं ररक्ष। तत्र धर्मनिष्ठाः सर्वे स्वे-स्वे कर्मण्यतन्द्रिता आसन्। प्रजाजनाः धनौघेन तुष्टाः। न क्वापि स्तेनस्य भयम्. अतः सर्वे शर्वर्यां निर्भयाः शेरते। रमण्यः पतिव्रताः विजितेन्द्रियाः च पुमांसः।[2] युक्ताहारविहारिणः जनाः संयमिनः। चिकित्सकानां स्वस्थवृत्तोपदेशनं कर्माभूत्। जलदः काले ववर्ष, अतः मही शस्येन शोभिता तथा च गावः नित्यं पयस्विन्यः। न कर्हिचित् कोपजिह्मं शोकसन्नम् उद्विग्नं जीवनम्। राजानः स्वार्थलुब्धाः न, न चार्थलुम्पकाः मन्त्रिणः। वणिजः वञ्चकाः न, प्रमादिनः जना अपि न। ते सर्वे पराक्रमे श्रद्धानाः।[3] सर्वे

भूसुराः ज्ञानिनः क्षत्रियाश्च शौर्यभूषणाः । शूद्राः विप्रादिसेवने सततं दत्तावधानाः । रामराज्यस्य सर्वाधिकवैशिष्ट्यम् इत्थमस्ति —

नाकालमृत्युः कस्यापि नाकाले च जरागमः ।
ब्रह्मचर्यसमापन्नवरकन्याकरग्रहः ॥[4]

सर्वे पुत्राः पितृपरायणाः वात्सल्यप्रतिमाश्चाम्बाः । कश्चित् क्षुधाविष्टः नासीत् । जनाः प्रमदासक्ताः न, तथा च गेहे कलहः नाभूत् । तद्राज्ये क्वापि नास्तिका दृष्टिपथं न गताः । वृद्धाः विरतभोगाः भक्तिपरायणाः हरेर्नाम जपन्तः सन्तुष्टाः ।[5] मनस्विनः भटा मातृभूमेः रक्षार्थं नित्यं प्राणान् जिहासवः । विकत्थकाः जल्पकाः मौनिनः नासन् । सर्वे संयतमानसाः काले एव सत्यां प्रियां च गिरं प्रोचुः । धर्मकृत्येषु लीनाः सर्वे तद्रामराज्ये ससुखमवसन् ।[6]

कवेः शुभाकाङ्क्षा—

'तेनाधुनापि तद्राज्यं प्रजासुखकरं जनाः ।'[7]

कविः रामं निवेदयत्यपि यत् हे नाथ ! भारते निर्मलं स्वं राज्यं पुनर्दर्शय ।[8] कविना निरूप्यते आधुनिकरामराज्यम्—

(क) त्यागपूर्णो भोगः–तद्राज्ये अन्यस्य कृते अनुपमः त्यागः दृश्यते स्म । भ्रातृणां मिथश्च निरन्तरं प्रीतिः ।[9] भरतस्य त्यागपूर्णो भोगः अनुकरणीयः—

'तेहि पुर बसत भरत बिनु रागा ।
चञ्चरीक जिमि चम्पक बागा ॥[10]

कविः प्रमाणीकरोति उपनिषत्सूक्तिं 'तेन त्यक्तेन भुञ्जीथाः ।'[11] इति । तद्वदेवास्माभिः आचरणीयम् ।

(ख) कारुण्यसिन्धोः सततप्रवाहः–परपीडां परिदृश्य करुणाया उद्भावनया एव मङ्गलराज्यस्य संकल्पना सार्थकीभविष्यति । करुणया एव शोकः श्लोकत्वमागतः लोककल्याणकारिणी कथा चाऽऽविर्भूता । अतः कविः निगदति—

'सदा कारुण्यसिन्धोश्च कारुण्यं सहजं भवेत् ।'[12]



(ग) सत्यसङ्कल्पो राजा–सत्यसन्धः रामः प्रजानुरञ्जनाय स्वकीयां प्रियां भार्यां हातुमुद्युक्तः । तात्पर्यमिदं यथा लोकहिते रतः रामः अहर्निशं प्रजानुरञ्जनम् अभिलषति तथैव पुनः अस्माकं भारतभुवि शासकाः स्युः । एतैः प्रजार्थं स्वीयं सर्वस्वं हातुं दर्शितविक्रमैः भवितव्यम् [13] इति कवेः शुभाशयः ।

(घ) प्रेमपूर्णं वातावरणम्-जनपदे स्तेनाः न स्युः, दस्यवः वैरिणश्चापि न स्युः । सर्वे जनाः मैत्रीं समापन्ना निर्भयाः विचरन्तु । न क्वापि क्लेशः लेशमात्रम्, न कुत्रचित् वैरभावना, न चौरभीतिः, न च कुत्रापि ईर्ष्याद्वेषभूमिः । सर्वे सौहार्द्रपूर्णे वातावरणे जीवनं यापयन्तु इति ।

(ङ) निर्मलचित्ताः जनाः–धर्मनिष्ठाः जनाः धर्मचारिणः वा शाश्वतं परहिते युक्ताः स्युः-'कदा भवेयुर्देशेऽस्मिश्छद्मशून्या गुणार्थिनः ।'[14]

अत्रायं वस्तुध्वनिः यत् सम्प्रति सम्पूर्णे देशे छद्मं साम्राज्यं चलति । जनानां मनोवचनकर्मसु भिन्नता दृश्यते । अत एव लोककल्याणकारिणी भावना न जागर्ति । कवेराधुनिकरामराज्यसंकल्पना तदा एव सार्थक्यमाप्नोति यदा जनाः छद्मशून्याः निर्मलचित्ताः भवेयुः । नेतारः एव छद्मप्रियाः चेदस्माकं सामान्यजनानां का कथा ?

**(च)** नारी-प्रतिष्ठा—निखिलेऽस्मिन् संस्कृतवाङ्मये नारीप्रतिष्ठा ध्वनितास्ति । किंतु साम्प्रतं नारी-उत्पीडनेन 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इतीयमुक्तिः निरर्थकी प्रतीयते । अस्मिन् विषये महाकवेः भवानीदत्तस्य परिकल्पना श्लाघ्या यत् स्त्रीणां सतीत्वरक्षायै वयं खल्वर्पितजीवनाः भवामः चेद् रामराज्यं नूनमेवागमिष्यति ।

समासतः महाकविभवानीदत्तशर्मा मानवजीवनस्य प्रत्येकस्मिन् क्षेत्रे शुभान्दोलनं काङ्क्षति । इह हीदानीं सर्वत्र विद्रूपकोलाहलं श्रूयते, न श्रूयते वेदध्वनिः । भ्रातृद्रोहः दृश्यते न खलु भ्रातृप्रेम । अस्मिन् विरोधाभासभरिते जीवने कविः आकस्मिकं परिवर्तनम् आनेतुम् आधुनिकरामराज्यस्य परिकल्पनां विधाय सर्वजनहितं सर्वजनसुखमभिकाङ्क्षतीति शम् ।

## सन्दर्भसूची

1. भरतचरितम् १५/७७ 2. भरतचरितम् १५/५

| | | | | | |
|---|---|---|---|---|---|
| 3. | भरतचरितम् | १५/१३ | 4. | भरतचरितम् | १५/२० |
| 5. | भरतचरितम् | १५/५४ | 6. | भरतचरितम् | १४/१३५ |
| 7. | भरतचरितम् | १५/७७ | 8. | भरतचरितम् | १५/८४ |
| 9. | भरतचरितम् | १५/७६ | 10. | तुलसीदास, रामचरित-मानस, अयोध्या-काण्ड | २२३/७ |
| 11. | ईशावास्योपनिषद् | 1 | | | |
| 12. | भरतचरितम् | १५/७८ | | | |
| 13. | भरतचरितम् | १५/८० | 14. | भरतचरितम् | १५/८२ |

★



# पाणिनीय-'कि'-प्रत्ययस्य विश्लेषणम्

डा० गोपबन्धु मिश्रः

पाणिनेः व्याकरणे कृतां प्रत्ययानां रूपगतैः अर्थगतैः च वैशिष्ट्यैः विविधाः कृदन्त-शब्दाः निर्मीयन्ते तथा च विविधेषु अर्थेषु ते व्यवह्रियन्ते। एतेषु सोद्देश्यं सन्नद्धा अनुबन्धा लोपागमविकारादिभिः विधिभिः एवं च गुणवृद्ध्यादि-निषेधैः शब्दानाम् इष्टं रूपं साधयन्ति। एवमेव सामान्यविशेषोपायाभ्यां निर्दिष्टान् अर्थान् अभिव्यञ्जयन्ति। एतादृशानां विशिष्टशक्तिसम्पन्नानां सम्पूर्णं विश्लेषणात्मकम् अध्ययनम् एतेषां शब्दप्रजनन (Word-generation)-क्षमतां शब्दस्तरीकरण (Word-Stratification)-सामर्थ्यं च ऊरीकरिष्यति इति मत्वा तादृशे कर्मणि सन्नद्धेन लेखकेनाऽत्र 'किं' इत्याख्यस्य कृत्-प्रत्ययस्य विश्लेषणात्मकं विवरणं प्रस्तूयते।

कि (=इ)

लशक्वतद्धिते (१. ३. ८) इति ककारस्य इत्-संज्ञा, तस्य लोपः (१. ३. ८) इति तस्य इतो लोपः। 'इ' इति अवशिष्यते।

स्वभाव :— (i) कित्। अतः क्ङिति च (१. १. ५.) इति गुणनिषेधः, आतो लोप इटि च (६. ४. ६४) इति धातोः आकारलोपः।

(ii) आर्धधातुकः (आर्धधातुकं शेषः ३. ४. ११)।

(iii) अजादिः

१. विधि :— आदृगमहनजनः किकिनौ लिट् च ३. २. १७१ अर्थात् आकारान्तात् ऋवर्णान्तात् गम्-हन्-जन् इत्येतेभ्यः च धातुभ्यः तच्छीलादिषु अर्थेषु वैदिकविषये कि-प्रत्ययः किन्-प्रत्ययश्च स्याताम् तथा च एतयोः प्रत्यययोः लिड्वद्भावः।

अनुवर्त्तनम्— तच्छीलतद्धर्मतत्साधुकारिषु ३. ३. १३४, वर्तमाने ३. २ १२३

प्रकृति :—(i) आकारान्तधातुः, यथा-पा पाने, भ्वादिः, परस्मैपदी

(ii) ऋवर्णान्तधातुः, यथा-तॄ प्लवनतरणयोः, भ्वा॰ पर॰

(iii) गम् (गम्लृ) गतौ, भ्वा॰ पर॰

(iv) हन् (हन) हिंसागत्योः, अदा॰ पर॰

(v) जन् (जनि) प्रादुर्भावे, दिवा॰ आत्मनेपदी

प्रयोगः —(i) पानं शीलम् अस्य=पा+कि=पपिः 'पानकर्त्ता' (लिड्वद्भावत्वेन 'लिटि धातोः' ६. १. ८ इति धातोः द्वित्वम्, अभ्यासकार्यम्, 'आतो लोप इटि च' ६. ४. ६४ इति आकारलोपः)। 'पपिः सोमम्' (ऋग्वेदः ६/२३/४)

(ii) प्लवनं तरणं वा शीलम् अस्य=तॄ+कि='ततुरिः' 'तरणकर्ता'। द्वित्वम् अभ्यासकार्यं च पूर्ववत्, बहुलं छन्दसि ७. १. १०३ इति ऋकारस्य अकारादेशः, उरण् रपरः १. १. ५१ इति रपरत्वम्)। 'मित्रावरुणौ ततुरिः' (ऋ॰ वे॰ ४/३९/२)

(iii) गमनं शीलम् अस्य=गम्+कि=जग्मिः 'गमनशीलः (द्वित्वम् अभ्यासकार्यं च 'पपि'वत्)। 'जग्मिर्युवा' (ऋ॰ २/२३/११)

(iv) हननं शीलम् अस्य=हन्+कि=जघ्निः 'हननकर्त्ता' (पपिः इव द्वित्वम्, अभ्यासकार्यम्)। 'जघ्निर्वृत्रम्' (ऋ॰ वे॰ ६/६१/२०)

(v) जननं शीलम् अस्य=जन्+कि=जज्ञिः 'जननकर्ता', (पपिः इव द्वित्वम्, अभ्यासकार्यम्), 'जज्ञिर्बीजम् (तै॰ सं॰ ७/५/२०/१)



विशेषः—(क) प्रकृतसूत्रेण विहितयोः कि-किनोः केवलं स्वरगतं वैशिष्ट्यम् अस्ति (किनः नित्त्वात् ञ्नित्यादि॰ ६. १. १९७ इति आदिः उदात्तः।

(ख) किकिनावुत्सर्गः छन्दसि सदादिभ्यो दर्शनात् (वा॰ ३. २. १७१) अर्थात् उपर्युक्तसूत्रेण यथाधातु विहितौ कि-किनौ औत्सर्गिकौ सामान्यौ वा प्रत्ययौ स्तः (अर्थात् वेदे एतदतिरिक्तधातुभ्योऽपि एतौ प्रत्ययौ विधीयेते), यथा—सद्+कि=सेदिः।

२. विधि :—भाषायां धाञ्कृञ्सृजनिगमिभ्यः किकिनौ वक्तव्यौ (वा॰ ३. २. १७१)

अर्थात् लोके धा-आदिधातुभ्यः तच्छीलादिष्वर्थेषु कि-किनौ प्रत्ययौ स्तः तयोः लिड्वद्भावश्च।

प्रकृतिः—(i) धाञ्, (ii) कृञ्, (iii) सृ, (iv) जन् (जनी) प्रादुर्भावे, दिवा॰ आत्म॰, (v) गम्।

प्रयोगः—(i) धा+कि=दधिः 'धारणकर्ता' (लिड्वद्भावेन 'लिटि धातोः' ६. १. ८ इति धातोः द्वित्वम्, अभ्यासकार्यम्, 'आतो लोप इटि च' ६. ४. ६४ इति आकारलोपः)।

(ii) कृ+कि=चक्रिः 'कर्ता' (द्वित्वादि पूर्ववत्, 'इको यणचि' ६. १. ७७ इति यणादेशः)।

(iii) सृ+कि=सस्रिः 'सरणशीलः' (द्वित्वादि 'चक्रि' वत्)

(iv) जन्+कि=जज्ञिः 'जनकः' (रूपसिद्धिः प्रथम-विधिवत्)

(v) गम्+कि=जग्मिः 'गमनकर्ता' (रूपसिद्धिः प्रथम-विधिवत्)

३. विधिः—सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ (वा॰ ३. २. १७१)

सह्-आदिभ्यः धातुभ्यः यङ् प्रत्यये सति किकिनौ स्तः।

प्रकृतिः (i) यङन्त सह्=सासह्य (धातोरेकाचो० ३. १. २२ इति यङ्, दीर्घोऽकितः ७. ४. ८३ इति अभ्यासदीर्घः)।

(ii) यङन्त वह्=वावह्य

(iii) यङन्त चल्=चाचल्य

(iv) यङन्त पल्=पापल्य

(v) यङन्त पत्=पापत्य

प्रयोगः—(i) सासह्य+कि=सासहिः 'वारं वारं सहनशीलः'

(ii) वावह्य+कि=वावहिः 'वारं वारं वहनशीलः'

(iii) चाचल्य+कि=चाचलिः 'वारं वारं चलनशीलः'

(iv) पापल्य+कि=पापलिः 'वारं वारं पलायनपरायणः'

(v) पापत्य+कि=पापतिः 'वारं वारं पतनशीलः' (यङोऽचि च २. ४. ७४ इति यङो लोपः,

४. विधिः—उपसर्गे घोः किः ३. ३ ९२
भावे कर्तृभिन्ने कारके च सोपसर्गात् घुसंज्ञकात् धातोः (दा-धाधातुभ्यां) 'कि' प्रत्ययः।

अनुवर्त्तनम् — अकर्तरि च कारके संज्ञायाम् (३. ३. १९), भावे (३. ३. १८)

प्रकृतिः— उपसर्गेण युक्तः घुः अर्थात् (i) दा दाने, जुहो०, पर०,

(ii) धा धारणपोषणयोः, जुहो० पर०, उभयोः घु-संज्ञा (दाधा घ्वदाप् १. १. २०)

प्रयोगः (i) प्र–दा+कि=प्रदिः 'प्रदानम्' (आतो लोप इटि च ६. ४. ६४ इति आकारलोपः)

(ii) नि–धा+कि=निधिः 'सम्पत्तिः' (आतो लोप० ६. ४. ६४ इति आकारलोपः। एवमेव सम्+आ+धा ······ समाधिः, वि+आ+धा ······ व्याधिः, उप+आ+धा ····· उपाधिः, प्रति+नि+धा ..... प्रतिनिधिः इत्यादि।



विशेषः—अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या (वा० १. ४. ६५)

प्रयोगः—अन्तर्+धा+कि=अन्तर्धिः अपह्नवः' (पूर्ववत् आकारलोपः)।

५. विधिः—कर्मण्यधिकरणे च ३. ३. ९३
कर्मणि उपपदे सति घुसंज्ञकात् धातोः (दाधाधातुभ्याम्) अधिकरणे 'कि' प्रत्ययः।

अनुवर्त्तनम् — घोः किः (३. ३. ९२)

विशेषः — सूत्रे 'कर्मणि' इति सप्तम्यन्तत्वेन उपपदसंज्ञा (तत्रोपपदं सप्तमीस्थम् ३. १. ९२)

प्रकृतिः —कर्मोपपदयुक्तात् घु-संज्ञकः (दा, धा धातुद्वयम्, दाधा घ्वदाप् १. १. २०)। यथा-जलं धा।

प्रयोगः —जलं धीयतेऽस्मिन्=जल+धा+कि=जलधिः 'समुद्रः' (आतो लोप० ६ ४. ६४ इति आकारलोपः)

'कि' प्रत्ययेन सम्बद्धं स्थलम्

१. न लोकाव्ययनिष्ठाखलर्थतृनाम् २. ३. ६९
अर्थात् लादेशस्य प्रयोगे सति कर्तृकर्मणोः कृति २. ३. ६५ इति प्राप्ता षष्ठी न भवति।

प्रसङ्गः —आदृगम ३. २. १७१ इति विहितः किः लिट्-लकारवत् व्यवह्रियते, अतः तत्र किः लादेशः अस्ति।

प्रयोगः — पपिः सोमम्। पा+कि=पपिः। अत्र आदृगम ३. २. १७१ इति कि-प्रत्ययः। अतः कर्तृकर्मणोः कृति २. ३. ६५ इति प्राप्ता षष्ठी अनेन सूत्रेण निषिध्यते, अतः 'सोमस्य' इति न भवति।

२. पेषंवासवाहनधिषु च ६. ३ ५८
अर्थात् 'धि' (धा+कि) इति स्थिते उदकस्य उद-आदेशः

प्रयोगः —उदकं धीयतेऽस्मिन्=उदक+धा+कि=उदधिः 'समुद्रः'। अत्र कर्मण्यधिकरणे च ३. ३. ९३ इति कि प्रत्ययः। प्रस्तुतेन सूत्रेण उदकस्य उद-आदेशः —उदधिः।

## संस्कृतप्रसारपरिषद्, आरा

# प्रकाशनम्

१ मेघदूतम् ( सभूमिका-हिन्दीपद्यानुवादसहितम् )
—स्व॰ पण्डित कमलाकान्त उपाध्यायः
१५ रूप्यकाणि

२ भोजपुरी नीतिसतक ( भर्तृहरि नीतिशतक'स्य भोजपुरी-पद्यानुवादः )
—श्री देवकुमार मिश्रः 'अलमस्त'
१५ रूप्यकाणि

३ पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
—श्री नर्मदेश्वर ओझा
१५ रूप्यकाणि

४ माण्डूक्योपनिषद्-'नलिन'-भाष्य
—पं॰ जगदीश्वर प्रसाद मिश्र 'नलिन'
३५ रूप्यकाणि

५ भरतचरितम् ( महाकाव्यम् ) —स्व॰ भवानीदत्त पाण्डेयः
५१ रूप्यकाणि

६ राष्ट्रियता : सांस्कृतिक अवधारणा —श्री नर्मदेश्वर ओझा
५१ रूप्यकाणि

७ संस्कृतनिबन्धसञ्चयनम् —पं॰ व्रजभूषण मिश्र 'आक्रान्तः'
४१ रूप्यकाणि

८ ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन' भाष्य
—श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
५१ रूप्यकाणि

९ आध्यात्मिकनिबन्धसंग्रह —श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
५१ रूप्यकाणि

१० उपेन्द्रविज्ञानदर्शनम्
( वेदान्तग्रन्थः ) —स्व॰ पण्डित उपेन्द्रनारायणदत्त शर्मा
यन्त्रस्थम्

११ महाभारतसारसंग्रहः —स्व॰ पण्डित वचन मिश्रः
प्रकाश्यः



# विष्णोर्मुखस्य वैशिष्ट्यम्

विश्वनाथ रामः

देवेषु विष्णुः अन्यतमः। ब्राह्मणग्रन्थेषु पुराणेषु च अत्यन्तप्रसिद्धस्य देवस्य विष्णोः स्थानम् ऋग्वेदे यद्यपि न्यूनमस्ति तथापि देवशास्त्रीय-दृष्ट्या विष्णुः अत्युच्चपदं समलङ्करोति इत्यतः एषः परमपदस्य अधिष्ठाता। द्युस्थानीयस्य एतस्य ऋग्वेदे पञ्चसूक्तेष्वेव स्तुतिर्विद्यते। वैदिकपरम्परायाः वाहकमेतस्य आङ्गिकवैशिष्ट्यं बहुधा वैष्णवस्तोत्रेषु संप्राप्यते। वस्तुतः अङ्गेषु मुखस्य वैशिष्ट्यं निर्विचिकित्सया स्वीक्रियते। अतएव अत्र विष्णोर्मुखस्य एव वैशिष्ट्यं प्रतिपाद्यम्।

सुन्दरस्य शरीरस्य मूलाधारोऽस्ति मुखम्। पुष्टेष्वपि अपरेषु अङ्गेषु मुखे कुरूपे सति न भवति कश्चिद् रूपवान्। तेनैव भूमण्डलेऽस्मिन् मुखाकृतिं संप्रेक्ष्य एव सुन्दरतायाः मानं विनिश्चीयते। कवयोऽपि स्व-रचनासु अङ्गानां विशिष्टतया उल्लेखं कुर्वन्ति। तत्रापि विविधेषु अङ्गगतेषु वैशिष्ट्येषु मुखस्य विशिष्टता आवर्जनीया। कवेः अलङ्काराणाम् आश्रयाः सन्ति मुखमण्डले स्थितानि एतानि अङ्गानि। यथा-भालः, नेत्रम्, नासिका, अधरपटलम्, दशनम्, ग्रीवादयः। तस्मादेव वेदाङ्गचर्चासु 'मुखं व्याकरणं स्मृतम्'[1] इति प्रमाणीकरोति मुखमण्डलस्य वैशिष्ट्यम्।

सौन्दर्यवर्णने प्रायशः नायिकाः विशिष्टतया उल्लेख्याः। तासां काचित् 'पक्वबिम्बाधरोष्ठी'[2] तु काश्चित् 'शिखरिदशनाः'। क्वचित् 'चकितहरिणीप्रेक्षणा' नायिका दृश्यते तु क्वापि 'उन्नतभाललसिता'। विद्रूपकथने दैत्यानां विसज्जित-केशः, विशालासुन्दरचक्षुः, लम्बश्मश्रवः, बहिर्निर्गताः दन्ताः, वृषभश्रृङ्गम् इत्यादयः बीभत्सरूपं कल्पयन्ति। कल्पनामात्रेणैव भीतिः समागच्छति। एवमेव देवानां स्मरणेन तेषामाकर्षकं मुखमण्डलं लावण्यमयं शरीरं विद्युदाभा इव भासितदन्ताः सुसज्जितकेशाश्च स्मृतिपथे समायान्ति। यथा-रामस्य सौन्दर्य-वर्णने—

वरदन्त की पंगति कुंदकली अधराधरपल्लव खोलन को,
चपला चमकै घन बीच जगै छवि मोतिन माल अमोलन को ।[3]

देवेषु विष्णोः मुखम् अतीव शोभनम् । तस्य स्मितमुखं सदैव प्रफुल्लितं दिव्याभाभासितञ्च विद्यते । तस्य मुखदंष्ट्राम् असामान्यरीत्या वर्णयन् 'सुमुखः' 'स्वास्यः' इति कथ्यते । स्वास्यस्य दार्शनिकव्याख्याक्रमे गदितं विद्यते—

"आसनमास्या, स्वयं स्वस्मिन् वा आस्मा यस्य सः स्वास्यः" ।[4]

तात्पर्यमिदं यत् यः स्वस्मिन् निवसति स एव स्वास्य इति । पारम्परिक-दृष्ट्या च 'शोभनमस्ति मुखं यस्य सः' इत्यर्थोऽपि स्वीकर्त्तव्यः । इह हि 'सुमुखः' इत्यस्य विशिष्टार्थः यत् यथा सागरः सहजतया नदीनदान् ग्रसति तथैव यद् मुखं सर्वं ग्रसितुं क्षमः सः एव सुमुखः विष्णुरिति ।

चारुदेवस्य विष्णोः अखिलं शरीरं हिरण्यमयं विद्यते । एतस्मात् 'सुवर्णवर्णः'[5] इति कथ्यते । एतस्य नेत्रयोः अनेकाः विशिष्टताः सन्ति । तेन स शुभेक्षणः स्वक्षः महाक्षः सहस्राक्षः लोहिताक्षः पुण्डरीकाक्षः सुलोचनः रविलोचनः इत्यादिभिः नामभिः ज्ञायते । एतस्य कर्णौ स्वर्णकुण्डलस्य कान्त्या शोभमानौ इत्यतः शुचिश्रवा[6] एषः । चारुत्वेन मुखमण्डलेन सुमुखः[7] शोभायमानौ बाहू अतः सुभुजः ।

'प्रजापतिरूपं धर्मं दधत् स सर्वत्र व्याप्तः, सर्वाः प्रजाः रक्षयति, भोजयति, कुटिलयति च बन्धनविशेषैरिति शोभनभुजः 'सुभुजः' उच्यते ।'[8]

पुष्पमिव प्रफुल्लितः एषः पुष्पहासः[9] तथा च जन्ममरणाभ्यां मुक्तः सन् असौ 'अमृतवपुः[10] कथ्यते । अतएव उक्त-दिव्यविशेषणत्वात् स्पष्टं भवति यत् विष्णुः देवेषु अनुपमः मुखसौन्दर्यसंवलितः उदात्तहृदयश्च अस्ति ।

इह लोके सुन्दरं कुत्सितञ्च रूपं शुभाशुभयोः फलयोः संकेतः भवति । निजरूपलावण्येन विष्णुः अखिलेभ्यः प्राणिभ्यः मङ्गलकारकः । वस्तुतः एषः प्राणिनां भर्त्ता । एतदर्थमेव पुरोहितः यजमानस्य कल्याणकामनाम् अभि-काङ्क्षते—

मङ्गलं भगवान् विष्णुर्मङ्गलं गरुड़ध्वजः ।
मङ्गलं पुण्डरीकाक्षो मङ्गलायतनो हरिः ॥



मङ्गलाचरणे प्रसिद्धेऽस्मिन् श्लोके विष्णोः मङ्गलस्वरूपस्य यत् चित्रणं विहितं तद् नूनमेव मुखसौन्दर्येण अनुप्राणितम् । समासतः, आङ्गिकसौन्दर्येण युक्तः एव विष्णुः दार्शनिकवैशिष्ट्योपेतः सन् लोककल्याणं नितरामाचरति ।

## सन्दर्भसूची


1. पाणिनीयशिक्षा, ४१–४२
2. कालिदासः, मेघदूतम् (उत्तरमेघः), श्लोकः २२
3. तुलसीदास, कवितावली
4. श्रीविष्णुसहस्रनाम, सत्यभाष्यम्, खण्ड २, पृ० ६०३
5. अथर्ववेदः, १५/१/२, 'स प्रजापतिः सुवर्णं ......।'
6. श्रीविष्णुसहस्रनाम, सत्यभाष्यम्, खण्ड १, पृ० १४०
7. ऋग्वेदः, १/६७/६, ७
8. श्रीविष्णुसहस्रनाम, सत्यभाष्यम्, खण्ड १, पृ० ३०१
9. अथर्ववेदः ५/४/४, 'तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ।'
10. ऋग्वेदः, १/१०२/८ सनादसि ।

एकं चिन्तनम्

# "मरणं प्रकृतिः शरीरिणाम्"

गोपबन्धुः

मर्त्यः मरणशीलः। मरणं शीलं स्वभावः प्रकृतिः वा यस्य सः मरणशीलः। किं सर्वेषां शरीरधारिणां प्राणिनां मरणमेव शीलम्? शवमेकं दृष्ट्वा एतादृशः प्रश्नः पृष्ट आसीत् युवराजेन गौतमेन। नवजातस्य शिशोः, क्रीडासक्तस्य तरुणस्य, कामिनीरवतस्य यूनः, मोहग्रस्तस्य वृद्धस्य वा मृत्युः एव गतिः। जन्मन आरभ्य एव एषा गतिः। प्रतिक्षणं शिशुः वर्धते इति बोधः भ्रमात्मकः सत्यात्परो वा। अपरं तु जन्मनः अनन्तरं प्रतिक्षणं मरणं मृत्युमुखापेक्षिता वेति सत्यम्। तर्हि क्षणं क्षणं म्रियमाणस्य प्राणिनः जीवनं किम् असत्यम्? स यत् जीवति, तेन कारणेन मुह्यति शोचति काङ्क्षते अहंकरोति च, तत् सर्वं किम् अनृतम्? एतस्मिन् विषये यक्षप्रश्नम् उत्तरयतः युधिष्ठिरस्य कथनं 'शेषा जीवितुमिच्छन्ति किमाश्चर्यमतः परम्' इति उद्धर्तव्यम्।

एतदनुसारं जीवनम् असत्यं न, अपितु आश्चर्यमेव। जीवति इति जीवः, पुनः जीवः यत् जीवति तदेव आश्चर्यम्। अर्थात् यत्र तत्र, यस्मिन् कस्मिन्नपि आयुषि, येन केनापि व्याजेन प्राणिनः प्राणाः यत् निर्गच्छन्ति तत्र काऽपि अस्वाभाविकता नास्ति। अपितु मृत्युं यावत् सः जीवति इति आश्चर्यम्। कथितं हिन्दीकविना—

नवद्वार का पिंजडा ता मे पंछी पौन।
रहे सो अचरज भये गये अचम्भा कौन॥

महाकवेः कालिदासस्यापि इन्दुमतीमृत्युप्रसङ्गेऽनुरूपम् उक्तिः द्रष्टव्या—

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ॥

(रघुवंशम् ८/८७)



ललितनिबन्धः

# "याचितारश्च नः सन्तु"

अम्बिकादत्त त्रिपाठी 'व्यास'

'यचितारश्च नः सन्तु' वैदिकानाम् ऋषीणामियम् प्रार्थनाऽस्ति। "मा च याचिष्म कञ्चन" इयमपि कामनाऽस्ति। अनेनेदं ज्ञायते यत्तावत्कालीनः समाजः कीदृशः आसीत्, कीदृशीयं प्रार्थना आसीत्।

अनेनेदमभिज्ञायते यदयं समाजः सर्वतोभावेन समृद्धः अत एव दानशीलः प्रज्ञावानासीत् येन याचकानामभाव एव परिलक्ष्यते स्म यत इयं कामना कृताऽऽसीत्। अथवोदारतैवैतादृशी आसीत् यया सकलः समाजः परिपूर्ण आसीत्।

'मा च याचिष्म कञ्चन' इत्यस्माद्धेतोः सन्तोषामृततृप्ततैवोपस्थिता भवति याऽऽत्मतृप्तौ सहायिका भवति न तु धनाधिक्ये इत्यप्यनुमीयते। याचकत्वन्नाम पौरुषाभावः, व्यक्तित्वस्य लघुकरणे कारणम्। यो हि याचकस्तस्य नेत्रयोः लघुरपि महान् एव प्रतीयते. महानपि लघुर्भवति याचकत्वे। कविवरेण रहीमेन कथितं यत्—

"नारायण हूँ को भयो बावन आँगुर गात"

महाकविना बिहारिणाऽपि—

घर घर डोलत दीन ह्वै जन जन जापत जाय
दिये लोभ चश्मा चखनि लघु पुनि बड़ो लखाय।

इदृशीयञ्च याच्ञा यया महान्तोऽपि लघुभूताः।

'याच्ञा मोघा वरमधिगुणे नाऽधमे लब्धकामा'

इति कालिदासोक्तावपि याचना कस्मात्? अधिगुणादित्युत्तरे श्रेष्ठादुत्तमाऽधमाच्चानुत्तमेति याच्ञायाः कोटिद्वयमुक्तम्।

'मोघा' 'लब्धकामा' पदयोः फलद्वयमप्युक्तमेव द्वाभ्यां प्रकाराभ्याम्। 'मोघाऽपि वरम्, लब्धकामाऽपि न वर'मित्यत्रापि न केवलमलङ्कारत्वमपितु याच्ञायाः उभयत्राप्यसिद्धत्वमेव सिध्यति। को हि नामैतादृशो भवितुमर्हति यः प्राप्यापि खिद्यतेऽप्राप्यापि मोमुह्यते।

एवमपि श्रूयते यच्छाहजहाँनामा सम्राट् कदाचिद् नमाजनाम्न्या स्तुत्याऽल्लाहनामानमीश्वरं स्तौति स्म। तदैव कश्चित्, फकीराख्यः सन्यासी तमुपयाचितुं तत्रागत्य तं (सम्राजं) स्वाञ्जलिं प्रसार्य याचितारमेव दृष्ट्वा परावृत्य निर्गच्छन् सन् तेन पृष्टः-को भवान्, कथमायातः? कथं वा परावृत्तश्च?

फकीरेणाप्युक्तम् — महाराज! अहन्तु भवन्तमुपयाचितुमत्रागतवानासम् किन्तु किमनयाऽवद्यया याचकयाचनया। अतोऽहमितो निर्गच्छामि। अहन्तु भवन्तं सम्राजमिति मत्वा अत्रागतवान्नासम् किन्तु यदा भवानेव स्वयमेव याचते तदाऽहं कं याचे?

याचकात् याचना? नाम्नैवाऽसंगतिः। अहमपि तमेव याचिष्ये यं भवान् याचते। इयमेव नाधमे लब्धकामायाः याच्ञायाः संगतिः।

लघुरपि गुरुर्भवति दातृत्वे, गुरुरपि लघुर्भवति याचकत्वे। दातृयाचकयोर्द्वन्द्वे इयं वैदिकी प्रार्थनाऽस्ति "याचितारश्च नः सन्तु, मा च याचिष्म कंचन" नः अस्माकं समीपे पार्श्वे वा याचितारः सन्तु इति बहुवचनेनेदं प्रमीयते यदस्माकं पार्श्वे याचितार एव याचितारः सन्तु किन्तु वयं न कमपि याचिष्म। अनेनेदमपि अनुमीयते यदहम् एतादृशो विशालहृदय उदारमना आढ्यतमो वा भवितुं समर्थः येन विश्वस्य सम्पूर्णां याचकतां सर्वां निर्धनतां वा दूरीकर्तुं समर्थः स्याम्।

इयमेव विशालहृदयतोदारचित्तता च यस्यान्निमज्य सर्वो लोकोऽभ्युदयेन युज्येत, वसुधैव कुटुम्बसदृशी प्रतीयेत। का हानिः एतत्प्रार्थनास्वीकारे? यदा क्षुद्रोऽपि विशालतां प्राप्नुयात् लघुरपि गुरुतां महत्तां च प्राप्नुयात्। एकस्मिन्नेव हृदि एकस्मिन्नेव चित्ते सर्वेषां चित्तानामन्तर्भावात् "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवे" दिति प्रार्थनायाः कामनायाश्च समावेशः।



सर्वेषां सुखमयत्वे सर्वेषां निरामयत्वे सर्वेषाम्भद्रत्वे सर्वेषामदुःखभागित्वे च केषामापत्तिः? मानवानां महापुरुषाणां सज्जनानामेव न अपि तु दानवानामपि यथा बलिवामनप्रसङ्गे—

"येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥"

दानवेन्द्रो महाबलो बली राजाऽपि वामनेन छलाद् बद्ध इति सर्वे विदन्ति। छल एव बलं सर्वेषां कृते यथा हरिश्चन्द्रप्रसङ्गे इन्द्रस्य स्थितिः। हरिश्चन्द्राय इन्द्रेण प्रतिश्रुतो विश्वामित्रः कां कां यातनां न दत्तवानिति इतिहासपुराणेषु प्रथितां कथां के न जानन्ति?

दानवीरस्य कर्णस्य कथायां कवचं कुण्डलञ्च इन्द्रेण कथमपहृतमिति अपि के न जानन्ति? राज्ञो मोरध्वजस्य कथाऽपि प्रसिद्धैव यस्यां राजा स्वकीयं पुत्रं क्रकचैश्छित्त्वाऽश्रुपातनिरोधपूर्वकं तस्मै अर्पितवान्। लिखितञ्च मैथिलीशरण गुप्तेन स्वकीयभारतभारत्याम्—

क्षुधार्त्त रन्तिदेव ने दिया करस्थ थाल भी
परार्थ श्री दधीचि ने स्व अस्थिदान भी किये
उशीनर क्षितीश ने स्व मांस दान भी किये
वही मनुष्य है कि जो मनुष्य के लिये मरे॥

रन्तिदेवः—

एकदा राज्ञो रन्तिदेवस्य राज्ये द्वादश वर्षाणि यावदवर्षणं जातम्। महद् दुर्भिक्षमापतितम्। भिक्षाणामभावो यत्र तद् दुर्भिक्षं राज्यं दृष्ट्वा इन्द्रस्य हृदि रन्तिदेवस्य राज्ञः परीक्षायाः समय उचित इति मत्वा तद्द्वारमुपाजगाम। रन्तिदेवस्य पत्नी मासैकं बुभुक्षवे रन्तिदेवाय भोज्यस्थालीं दत्तवती तदैवेन्द्रेण आगत्य कथितम् यदहं मासद्वयादधिकं क्षुधार्त्तोऽस्मीति। राज्ञा रन्तिदेवेन चिन्तितं यदनेन ज्ञायते यद् यद्ययं बुभुक्षया मासद्वयं जीवति तदाऽहं स्वपत्नीसहितः मासमेकमग्रेऽपि जीविष्यामि। अतः स्वकरस्थस्थालीं तस्मै इन्द्राय ददौ इति प्रसिद्धमितिहासपुराणेषु।

राजा दधीचि :—

राज्ञो दधीचेः राज्ये सर्वाः प्रजाः सर्वे जनाः सुखिनः आसन् । न कोऽपि आधिः व्याधिश्च तस्मिन् राज्यं प्रशासति । स एव इन्द्रस्तत्रागत्य याचितवान्—हे राजन् ! त्वं महादानी असि । वृत्रासुरस्य विनाशाय भवतोऽस्थिनिर्मितं वज्रमेव सहायकं भविष्यति, यदि भवान् अश्रुपातनिरोधपूर्वकं स्वेच्छया गवां जिह्वाभिश्चोपयित्वा स्वास्थि स्वहस्तादेव मह्यं दास्यति । राज्ञा ईदृशमेव कृतं–येन दानिषु महतीं यशस्वितां लेभे ।

शिबिः—

अस्य राज्ञः राज्यसभायामेकदा एकः कपोत आगत्य राज्ञः सिंहासनस्याधः पतितः ।

तदैवैकः श्येनस्तत्रागत्य राजानं प्रावोचत्–राजन् । देहि मे आहारम् । अयं कपोतस्तव सिंहासनाधस्तात् तिष्ठति । अयमेव मम आहारः ।

राजा प्रोवाच—एष मम शरणागतः । शरणागतस्य रक्षा राजधर्मः । यद्ययं भवतः भोजनं तदा एतेन कपोतेन तुल्यं मांसं तुभ्यं दास्यामि । श्येनोऽवदत्-अहमनेन तुल्यं तव मांसमेव ग्रहीष्यामि ।

राजसभायां तुलाऽऽरोपिता । राज्ञा प्रथमं स्वबामहस्तस्य मांसं कर्तयित्वा तस्यां तुलायामारोपितम्. किन्तु कपोतस्य तुलाऽधस्तादेवासीत् । तदा राज्ञा स्वपादयुगलावेवार्पितौ । तदाऽपि कपोतोऽधिकः भारवत्तरः सञ्जातः । तदा राजा स्वयमेव तस्यां तुलायामुपविष्टः । एतद्दृष्ट्वा कपोतश्येना-विन्द्राग्नी बभूवतुः । श्येनश्चेन्द्रः कपोतश्चाग्निः । उभावपि प्रकटीभूय राज्ञे स्वाशिषं दत्तवन्तौ–राजन् ! त्वं परीक्षायामुत्तीर्णोऽसि । अतः दानिषु श्रेष्ठो भविष्यसि । सन्त्यन्यान्यप्यनेकान्युदाहरणानि यानि देवेभ्यः मानवानां महत्त्वाख्यापने सहायकानि । अयमिन्द्रोऽयमग्निश्च वारं वारं मनुजानां परीक्षायै स्वं स्वं विसस्मरतुः देवानां कीर्त्तिञ्च पराजितवन्तौ । इन्द्रः सुराणामधिपः । ऋग्वेदेऽनेके सूक्ताः सर्वाधिका मन्त्राः इन्द्रस्यैव सन्ति इति न काप्यत्युक्तिः । अग्निमीले पुरोहितमिति मन्त्रेण ऋग्वेदस्य प्रारम्भ एव । अमरकोषे असुराणां कृते 'पूर्वदेवा' अर्थात् देवेभ्यः पूर्वं येषां स्थितिः उपस्थितिर्वा कथिता । अतएव देवासुरसंग्रामेषु असुराणाञ्जयः देवानाञ्च पराजयः । तथापि मनुष्याः देवानामेव पूजका न तु असुराणामिति दिक् ।



पुतस्तक-समीक्षा

# गङ्गाजलं दूषितम्

समीक्षकः-सुनीलकुमारप्रधानः

पुस्तकस्य नाम-गङ्गाजलं दूषितम्, रचयिता-डक्टर हरेकृष्ण शतपथी, प्रकाशकः–किताब महल, कलेज स्कोयार, कटक, प्रथमं संस्करणम्, 1998, मूल्यम्-द्वाविंशतिः (22/–) रूप्यकाणि, पृष्ठानि-षट्पञ्चाशत् (56) ।

परिवेशपरिरक्षणार्थं गङ्गायाः दुरवस्थां च लक्ष्यीकृत्य विरचितमिदं खण्डकाव्यं 'गङ्गाजलं दूषितम्' निर्विचिकित्सया प्रासङ्गिकं श्लाघ्यं च विद्यते । प्रणेता खलु संस्कृतकाव्येषु कृतभूरिपरिश्रमः कुशलवाग्मी डक्टर हरेकृष्ण शतपथी अर्वाचीन-सुरभारती-समुपासकानाम् अन्यतमः । अस्मिन् लघुकाव्ये गङ्गायाः वैशिष्ट्यं तथा च पुण्यसलिलायाः गङ्गायाः जलं कथं प्रदूषितमिति कविना गम्भीरतया प्रतिपादितम् ।

वस्तुतः भगीरथस्य क्लिष्टकर्मणा आविर्भूता इयं देवनदी भारतीयसंस्कृतेः प्रतीकस्वरूपा । सा जाह्नवी सम्प्रति विषण्णसलिला पङ्काकुला इत्यतः व्याकुला परिदृश्यते । एतस्याः जल-प्रदूषणेन अस्माकं देशस्य अखिलं सांस्कृतिकं सारस्वतञ्च वातावरणं कलुषितं सञ्जातम् । काव्येऽस्मिन् कविना चित्रितं यत् गङ्गाजलमेव भारतीयसंस्कृतेः वाहकमिति । गङ्गाजलस्य विशोधनार्थं काव्यमिदं बौद्धिकप्रेरणायाः प्रतिफलमेव यतो हि सर्वे केन्द्रसर्वकारयत्नाः निष्फलाः । अत्र कवेः क्रान्तदर्शिनी बुद्धिः भारतीयजनमानसिकतायाः परिवर्त्तन-कारिणी प्रतिभाति ।

भारतवर्षस्य अभ्युदयमूलं गङ्गाजलमेव, विज्ञानदानेन किम् ? कवेः चिन्तनं सुतरां श्लाघ्यं यत् 'शिल्पस्थापनतोऽर्थनीतिविषये वृद्धिश्च सम्भाव्यते । किन्तु तेनोक्तं स्पष्टतया–'किन्तु भवेत् सचेतनतया स्थानादिनिर्धारणम्' । अत्र कवेः स्वस्थ-चिन्तनप्रक्रियायाः दिग्दर्शनं भवति । कवेः हार्दिकी खेदोक्तिः नितरामास्वाद्या—

'हे जातेजनक ! स्वयञ्च भगवन् । गान्धिन् महात्मन् । तव
स्वाधीना शुभभावना क्व च गता ? श्रीरामराज्यं कुतः ।'
यतः गङ्गाजलं प्रदूषितम् ।

'नष्टे गाङ्गजले सुवासमलयः कुत्राद्य सम्प्राप्यते ?
भिन्ने भारतजीवने त्रिभुवने साम्यं कथं लभ्यते ?'
यतः गङ्गाजलं प्रदूषितम् ।

क्वचित् कविः उद्वेलितः भवति तु क्वापि शान्तरसाभिषिक्तः दृश्यते। कवेः पुरतः गङ्गाजलशुद्ध्यर्थं न कश्चिद् उपायः अतः स मातुः जाह्नव्याः पदाब्जयुगले एतां प्रार्थनां विदधाति–'गङ्गे। त्वत्करुणा करोतु निखिलं नष्टं जलं निर्मलम्'। एतस्मात् कवेः आत्मनिवेदनं लोककल्याणकारिणी विमला भावना अपि स्फुटति। समष्टिगतहितभावनासंवलितमिदं काव्यं भौतिकजीवन-यात्रायां पाथेयस्वरूपम् ।

'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च' इत्यनेन इदं काव्यं खण्डकाव्यम्। सर्वत्र काव्यात्मकता नैसर्गिकी निर्मलभावनाप्राबल्यञ्च सर्वत्र। शैली सरसा बोधगम्या च। छन्दः शार्दूलविक्रीडतम्। स्वभावोक्तिः अलङ्कारः प्रायशः स्फुटः भवति। मुद्रणदोषाः बहुधा प्राप्यन्ते। अस्तु। राष्ट्रविरोधिन्यस्मिन् आधुनिके वातावरणे इद ग्रन्थरत्नं नूनमेव राष्ट्रचिन्तनोन्मुखं भविष्यतीति विश्वासः।



# संस्कृतसौरभसञ्चयनम्

( अप्रकाशितसंस्कृतकाव्यनाटकादीनां संग्रहः प्रकाशनं च )

संस्कृतप्रसारपरिषच्छोधपत्रस्य 'आरण्यक'स्य परिशिष्टम्

## तृतीयं पुष्पम्

पण्डित उपेन्द्रदत्तशर्मप्रणीतम्

# भावनाविलासशतकम्

विविधभावनासंवलितम्

सम्पादकौ

पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

डा० गोपबन्धु मिश्रः

**संस्कृतसौरभसञ्चयनम्**

तृतीयं पुष्पम्

भावनाविलासशतकम्

विविधभावनासंवलितम्

प्रणेता

पण्डित उपेन्द्रदत्त शर्मा

सम्पादकौ

पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

डा० गोपबन्धु मिश्रः

प्रकाशिका

संस्कृतप्रसारपरिषद्

मारुतिमन्दिरम्, प्रकाशपुरी

आरा (विहारः)

मुद्रकः

आरा प्रिन्टर्स

गोला महल्ला ( निकट जैन स्कूल ), आरा

# पुरोवाक्

पण्डित उपेन्द्रदत्त शर्मणा विरचितं 'भावनाविलासशतकं' प्रकाश्येयं संस्कृतप्रसारपरिषद् अत्यन्तं मोदं गौरवं चानुभवति। इदं १९५४ विक्रमाब्दे (१८९७ ई० सं०) ज्येष्ठकृष्णचतुर्थीतिथौ प्रकाशितम् आसीत्। वर्तमाने २०५७ विक्रमाब्दे (२००० ई० स०) संस्कृतवर्षे च शतकमिदं शतं वर्षाणि अत्यक्रामदिति महत् वैशिष्ट्यं तनुते। पूर्वं प्रकाशितमपीदम् इदानीम् अप्राप्यमस्ति। कालस्य क्रूरप्रभावेण क्रमशः जीर्णतामाप्तवतः अस्य शतकस्य एकं मुद्रितं प्रतिरूपं स्थानीयमारुतिसंस्कृतशोधसंस्थाने कथमपि सुरक्षितमासीत्। जीर्णकायं तत् कदाचित् स्मरणीयां दशां यथा नाप्नुयात् तदर्थं तस्य पुनः सम्पादनं मुद्रणं च कर्तव्यमिति मत्वा इदं प्रकाशनकार्यं क्रियमाणमस्ति।

पण्डित उपेन्द्रदत्तशर्मा विहारप्रान्तस्य भोजपुर (प्राचीन 'शाहाबाद') मण्डलान्तर्गतस्य 'पवना'ग्रामस्य निवासी आसीत्। पण्डित दामोदरपाण्डेयस्य कुले पण्डित चन्द्रमणिपाण्डेयस्य तृतीयपुत्ररूपेण लब्धजनिः एषः पटनामण्डलान्तर्गतस्य राघवपुरग्रामस्य निवासिनः महामहोपाध्याय १०८ श्री अनन्तराममिश्रस्य शिष्यः अन्तेवासी चासीत्। स्वगुरोः प्रतिष्ठामेव परमश्रद्धया एषः शतकप्रणेता शतकस्य समाप्तौ स्मरति, तद्यथा—'इति श्रीमत्परमहंसानन्तराममिश्रशिष्योपेन्द्रदत्तशर्मभावनाविलासशतकम्।'

स्वल्पे एव वयसि निखिलशास्त्रनिष्णातः शतककारः स्वग्रामे एव व्याकरण-वेदान्त-तर्कादिशास्त्राणि पाठयति स्म, विविधान् ग्रन्थानपि रचयति स्म। तेन विरचिता ग्रन्थाः एते सन्ति-(१) उपेन्द्रविज्ञानदर्शनम् (स्वरचितभाष्यसहितम्), (२) भावनाविलासशतकम्, (३) भवानीशस्तोत्रं च। 'उपेन्द्रविज्ञानदर्शनं' वेदान्तदर्शनसम्बद्धः मानवजीवनमूल्यनिरूपको मौलिको ग्रन्थः अस्ति। अत्र १६५ सूत्राणि (प्रतिसूत्रं ग्रन्थकारस्य स्वभाष्यसहितानि) सन्ति। १९५५-५६ संवत्सरे वाराणसीतः प्रकाशितस्य ग्रन्थस्याऽस्य सम्प्रति दुर्लभतायाः कारणेन संस्कृतप्रसारपरिषदियम् अस्मिन्नेव वर्षे तस्य पुनः प्रकाशनं कृतमस्ति।

'भावनाविलासशतकम्' इदं कवेः पं० उपेन्द्रदत्तशर्मणः स्वस्य विविधभावनानां विलासान् आश्रित्य प्रणीतमस्ति। अत्र खण्डद्वये क्रमशः ३४, ६६ श्लोकाः (आहत्य १००) विविधेषु छन्दःसु रचिताः सन्ति। सामान्यतः श्लोकाः भव-भवानीभक्तिपरकाः सन्ति। कविः प्रायशः स्वमानवजीवने कालुष्येभ्यः मुक्तये शङ्करस्य पार्वत्याश्च अनुकम्पां काङ्क्षते। कामिनीकामनाग्निदग्धः कविः शम्भोः निर्दयत्वं विवर्ण्य तं व्याजेन स्तौति, तद्यथा—

बलात्कामाक्रुष्टो लुठति विषमे तावकजनः।
स्मरारातेऽरित्वं तव फलति मिथ्येव नितराम्॥ (३६)

शतकमिदं सामान्यं शतकमिव शतेन श्लोकैः बद्धमस्ति। परन्तु कविः अत्र स्वातन्त्र्येण आगतानाम् अन्तर्निहितभावनानां विलासपूर्णम् असामान्यं च वर्णनं करोति। एतेन तस्य शिवभक्तिः यथा सिध्यति, ततोऽप्यधिकं तस्य जागतिकभावनानां लालित्यपूर्णः विलासः स्फुटीभवति।

शतकस्यास्य प्राचीनं यत् मुद्रितं प्रतिरूपमस्य प्रकाशनस्य आधारो वर्तते, तत् अतीव जीर्णं नष्टप्रायमेव। अतः अस्य पुनः संस्करणमिदं शतकस्य जीर्णोद्धरणमुद्दिश्य क्रियमाणमस्ति। शतकस्य मूलप्रतिरूपे कृतस्य खण्डद्वयस्य विभागे कोऽपि विशिष्टः तर्कः न दृश्यते इत्यतः उभयं खण्डमाहत्य शतकमिदम् (१ तः १०० यावत्) प्रकाश्यते।

संस्कृतप्रसारपरिषदः शोधपत्रे 'आरण्यके'ऽस्मिन् संस्कृतसौरभसञ्चयन-मित्याख्या योजना प्रारब्धाऽस्ति। अत्र अप्रकाशितानां संस्कृतकाव्यनाटकदर्शनादि-ग्रन्थानां सम्पादनपुरःसरं प्रकाशनमुद्दिष्टमस्ति। अस्यां योजनायां सर्वप्रथमं पं० बहोरपाठकरचितं 'सुदामचरितम्' प्रथमपुष्परूपेण, ततः अस्य पं० उपेन्द्रदत्त-शर्मणः 'उपेन्द्रविज्ञानदर्शनं' द्वितीयपुष्परूपेण प्रकाशितमस्ति। इदानीम् एतत् शतकं 'तृतीयपुष्प'रूपेण एतस्मिन् अङ्के प्रकाश्यमानमस्ति। शोधपत्रे प्रकाशनात् अनन्तरम् अस्य शतकस्य स्वतन्त्रतया पुस्तकरूपेण प्रकाशनं विधास्यते। एतेन अज्ञातस्य अल्पज्ञातस्य वा शतकस्यास्य प्रकाशनेन संस्कृत-शतकसाहित्यं समृद्धतरं भविष्यतीति आशास्यते।

**गोपबन्धु मिश्रः**
सम्पादकः

मार्च, २०००

# अथ भावनाविलासशतकम्।

शम्भो स्वीयचिकीर्षितं कथय मां, स्यां चेदहं सेवकः,
सेवा सैव पुनः पुनर्भगवतो या भावना सात्त्विकी।
भावः प्रेमविशेष एव, मननं स त्वद्गुणानां भृशं,
तेऽपि त्वय्यनघे बलाद् व्रतधिया स्वस्मै स्वयं कल्पिताः॥१॥

एवं स्वार्थवशेन नाथ बहुना ब्रह्मादिना लाञ्छ्यसे,
तस्मै रासि तदीप्सितं, बुधमुखाद् गाथा चिराच्छ्रूयते।
तस्मादेव कलङ्क्यसेऽथ गुणितंर्दोषैर्मया मामकैः
क्षन्तव्योऽयमये ममाप्यविनयः, पौर्वात्तु चेत्सुन्दरः॥२॥

हाऽम्बा नाथ पराङ्मुखी मम चिरात्ताते शयाने त्वयि
त्वां नोद्बोधयते, स्वयं न कुरुते, रोदिम्यनाथो भृशम्।
कस्याहं पुरतः प्रयामि भगवन्, किं वा कुतोऽभ्यर्थये,
त्वं जागर्षि न, हा शृणोषि न, कथङ्कारं नु जीवाम्यहम्॥३॥

जाग्रच्चेन्न शृणोषि निर्दयतया, बाढं गतो मे भ्रमः
शम्भुः कारुणिकः प्रसीदति पुनर्न्नार्त्तारवं क्षाम्यति।
कामं पूरयति स्वकीयजनतामव्याजमारक्षति
प्रेम्णाऽऽश्वासयति स्वयं स्वविभवैरालङ्करोतीदृशः॥४॥

आहो स्विन्न मम भ्रमः, प्रमितया वाचा प्रमा जन्यते,
प्रामाण्यप्रतिबन्धकानवगमः प्रामाण्यहेतुर्न किम्।
आम्नायस्य परात्मनोऽधिगमनं विद्वद्भिराख्यायते,
वैचित्र्यादखिलात्पदाज्जनिमतस्तच्छ्रोत्रियाच्छ्रूयताम्॥५॥

नान्योन्याश्रय एष मन्तुमुचितो, भासि स्वशक्त्या स्वयं
व्याप्त्या कार्यमशेषतोऽस्य जगतस्तत्कारणैः कारयन् ।
मन्यन्तामपरे स्वभावमखिले शक्तिं त्वदीयां मुधा,
सत्यः सोऽनुभवस्त्वदीयकृपया जातस्त्वदीयेषु यः ॥६॥

नान्तर्यामितया विनेह भवता कोऽपि श्रुतः कैरपि,
त्वद्भिन्नोऽचिदसज्जडस्तु सुधिया स्वामी न सम्भाव्यते ।
त्वद्राहित्यजगत्स्थिती शुचिदृशा नो सङ्घटेतां, तथा
विभ्रंशे पुनरुद्भवोऽपि जगतो, राज्यं यथाऽराजकम् ॥७॥

सूर्याचन्द्रमसोर्व्यवस्थितगतिः, साक्षात्परोक्षा चितिः,
प्राप्ते निर्विषये सुखे हि विषये जीवस्य शम्भो स्थितिः ।
ऐश्वर्यं तव नाथ कस्य हृदये नेदं प्रवेष्टुं क्षमं,
जाने भूतपते भवान्भवति भोः सर्वं भवत्कल्पितम् ॥८॥

शम्भोऽस्मीति कुवृत्त्यहङ्कृतिफलं जन्मादि दुःखं समं,
नास्मीत्येतदहं कथं नु भगवन्नन्तः सदा भावये ।
नास्म्यस्मीत्युभयं समर्प्य भवते भावं भवानीपते
त्वत्पादाम्बुरुहे निधाय हृदयं स्वस्थः शये निर्भयः ॥९॥

गार्हस्थ्यं तव कीदृशं पशुपते, गङ्गाकपर्दे गले
क्ष्वेडो, भस्मसिते सिते सुवपुषि व्यालः, कपालः करे ।
गानं, नर्त्तनम्, आर्जवं रणजयः, कामाकुलत्वं, तथा
नग्नत्वं, स्मरजिष्णुता, गजमुखः षाण्मातुरश्चात्मजौ ॥१०॥

माता हैमवती, पिता स्मरहरो, भ्राताऽन्तरायापहा
हेरम्बः, स सुहृत्पतिर्धनपतिः, ख्यातः स सेव्यो हरिः ।
यस्यैतेष्वपि सत्सु सन्ति विपदस्तादृङ् मदन्यो जनः
स्याच्चेद्भूतपते श्रुतिं मम गतो, धैर्यं कुतो नाश्रये ॥११॥



शास्त्रं श्रावयति प्रभो भवगतिं सन्तापमालाकुलां,
रामा मां विषयीकृताऽऽकृषति भोः, पत्नी तु जीवन्मृता ।
कालः खादति देहमेष जरयन्नाशा तु नो मुञ्चति,
त्वं शेषे नवयौवनेऽपि विमुखे, जाने न किं भावि मे ॥१२॥

आचारो विरतिर्विचार उचितोऽनौचित्यमासेवते,
निर्दोषा प्रतिभा ममेव मदिरा शम्भोऽधुना गण्यते ।
विस्पष्टा कपटायते व्यहहृतिः, कीर्त्तिः कलङ्कायते,
तत्किं यद्विपरीयते न विमुखे सर्वेश्वरेशे त्वयि ॥१३॥

किं नाद्यापि विलोकसे मम दशां मातर्विपन्नां चिराद्
गार्हस्थ्यं न हि रोचते यदि, तदा हेरम्बमाज्ञापय ।
निःशेषं स करोतु साधनमितश्चित्तं मदीयं बला-
दाकृष्यार्पयतु, त्वदीयहृदयं यस्मिन् सदा लीयते ॥१४॥

मातस्त्वन्तु हितं ममाहितमपि स्पष्टं स्वयं वीक्षसे,
मौर्ख्यात्तद्विपरीतमेव कलयन् मोदे च रोदिम्यहम् ।
गार्हस्थ्यं क्व न मातुरम्ब रुचिरं तातप्रियं तत्कथं,
दम्पत्योर्युवयोर्यदस्ति रुचिरं, तद्वारणे कः क्षमः ॥१५॥

पाण्डित्ये विमुखीकृते, विकलिते मित्रेऽन्तरायैस्तथा
शत्रौ हृष्यति, निस्पृहे परिजने, निःशेषितेऽर्थेऽर्जिते ।
आर्त्तानां हृदयं विचारविकलं स्वार्थैकतानं मुहुः
को वाऽऽश्वासयितुं क्षमेत गिरिजे त्वन्नीलकण्ठं विना ॥१६॥

किं हलाहलपानतोऽपि गिरिजे मद्रक्षणं दुष्करं,
किं व्यालादपि कृष्णतः पशुपते क्रूरोऽस्मि किं वाऽधमः ।
कष्टं केन हृता दया तव, यया विख्यात आसीश्चिरं
यस्मिन्कापुरुषेऽपि सा बत दया, शम्भो तमेवाश्रये ॥१७॥

तारुण्यं पुनरेति किं मम शिवे गार्हस्थ्ययोग्यं, यतो,
गार्हस्थ्यं प्रतिबध्यते भगवता नैतत्त्वया दृश्यते ।
मन्ये मातरहं तवापि करुणा तेनैव कष्टं हृता,
येनाम्बापहृता महेशकरुणा, कोऽसौ, न किं दण्ड्यते ॥१८॥

किं नामाविदितं तवास्ति गिरिजे, यन्न त्वया दण्ड्यते
चोरोऽसौ, समुपेक्षितस्तु भवतोः सर्वस्वमप्याहरेत् ।
भावः प्राक्तनपुण्यपुञ्जवशतो योऽयं मया तेऽर्पित-
स्तं चेत्सोऽपहरेत्, तदा मम दशा कष्टं भवेत्कीदृशी ॥१९॥

यावत्त्वं न निरीक्षसे मम दशां, तावन्निरीक्षेत क-
स्त्वय्येवाभिमुखे हराभिमुखता मातुर्मयाऽऽशास्यते ।
सूत्रं पाणिनिना कृतं मतिमता युक्तं मया मन्यते
मातुर्नैव कदाऽपि शेष उचितः, शिष्याः पिता शिष्यताम् ॥२०॥

सूत्रार्थस्तु विभाति मे पशुपतेऽवश्यं विधेयेऽमुयोः
शेषे क्लेशशतेऽपि शिष्यविधवा कार्या न माता सती ।
ये शब्दे क्षणभङ्गुरे कुमतयः सूत्रं बलाद् युञ्जते
तेषामास्यविघातजन्यकलहादन्यत् फलं किं भवेत् ॥२१॥

स्वामिन्नेष सुहृच्चिरात्परिचितः श्रीमानुदारः स्वयं
सौहार्दं सुहृदां पुरः प्रकटयन् पूर्णं यश प्राप्नुयात् ।
इत्याशा न्यगिलत्समग्रसमयं, मेघावृते हाऽम्बरे
किं कार्यं, न विभाति भावि भगवन्मौनं परित्यज्यताम् ॥२२॥

एकेनोपकृतं प्रसिद्धिविधया, तावत्तदीयं कृतं
शम्भो मय्यधिकायते, कृपणतो रक्षा विधेया त्वया ।
जाने त्वत्कृपया प्रमाद्यतितरां नित्यं स धीमानपि
प्रायोऽन्ते विरसं विभाति सकलं, नो चेत्कथं स्याल्लयः ॥२३॥



लोकानां भृशमुत्थिते कलकले कीदृग् गृहं कार्यते
प्रासादीयति सर्वतो दृढतरं यज्जायमानं जनः ।
नूनं तत्प्रशमाय शङ्कर पुनः प्रादर्शि कोलाहलो,
दारिद्र्ये कृतसाहसस्य तु गतिः कीदृङ् न किं दृश्यते ॥ २४॥

क्षुद्रस्यापि जनस्य शङ्कर महालज्जा स्वकीयापदि,
त्वत्पादाम्बुरुहस्मृतावपि विपत्, तर्हि क्व भक्तिर्व्रजेत् ।
इत्यास्था कवचायते मम, न चेद्, आकृष्य चित्तं बलान्-
मत्तः क्वाप्यवटे निपात्य तरसा हन्युः परेऽप्याधयः ॥२५॥

शम्भो यच्च विकल्प्यते, प्रतिदिनं प्रातश्च सायं सदा
साम्बं त्वां प्रणिधाय निर्भयमना नैवाश्रयिष्ये परम् ।
किन्त्वभ्यासविरागयोगपरया बुद्ध्या निरुन्धन्मनः
स्वीये सद्मनि निर्विकल्पपदवीं प्राप्तुं यतिष्ये शनैः ॥२६॥

तच्चेत्साधु च सम्मतं च भगवन्निर्विघ्नमालोचसे,
गार्हस्थ्यं जगदीश पूर्णकृपया सम्पादय प्रार्थये ।
नो चेन्मा कुरु मा कुरु, प्रतिपलं सम्प्रार्थये जीवितं
शीघ्रं स्वीकुरु, नक्षमे क्षणमपि प्राणात्परः को बलिः ॥२७॥

देवो वर्षति, भित्तयः पशुपते नग्ना नवाः कीदृशः,
कीदृग्वा सुहृदां मनो, मम दशां प्राप्नोति कीर्त्तिस्तु काम् ।
किंवाऽभ्याशगतं निरीक्ष्य सहसा वक्ष्यन्ति मां दुर्जनाः,
कीदृग्वा सुहृदां मुखं हरिहरि द्रक्ष्यामि, वक्ष्यामि किम् ॥२८॥

नूनं नाथ परीक्ष्यते मम धृतिर्जानामि नापद्यते
त्वां ध्यायन्निह तावको, न हि वृथा ध्यानं तव श्रूयते ।
यावन्न प्रशमं विकल्पविकलं प्राप्नोति मे मानसं,
तावत् स्वास्थ्यमहं कथं नु भगवन् प्राप्स्यामि, तत्
प्रार्थये ॥२९॥

तृतीयं त्वन्नेत्रं स्वपिति, किमु जागर्ति गिरिश,
स्वकीयं वा कार्यं कलयसि न किं, क्वासि भगवन् ।
पतत्येषा वृष्टिः, प्रविशति जलं भित्तिविवरे,
गृहं गर्त्तप्रायं, शिव शिव तवाथाप्युपरतिः ॥४२॥

त्वदीयत्वं शम्भो व्यथयति मनो मे प्रतिपदं,
मदीयत्वं किं न त्रिनयन बलात्तावकमनः ।
त्वदीयेच्छा शक्तिर्भवति न समस्मिन्यदि तदा
हरायं व्यामोहो गरलमपि नूनं मम जयेत् ॥४३॥

न योगादन्यस्मिन्कथमपि कदाऽपि क्वचिदपि
प्रपद्येतानन्दो विषयजतया योऽप्यवगतः ।
प्रियाध्यानादन्यः क इह हर हेतुस्तव मतो,
मनस्स्थैर्यं योगो भवति, स हि सन्तोषमहिमा ॥४४॥

कथं वा सन्तोषो भवतु मम शम्भो प्रियतमा-
नवाप्तावासक्त्या वसति हि जहच्चित्तमखिलम् ।
परस्मान्निर्वेदः प्रियतमगृहीत्या हि स मतो,
न जाने को हेतुर्गणयसि न योगं मम कृते ॥४५॥

न चैकं पश्यामि प्रतिपदमवेक्ष्यापि, युगपन्
मनश्चक्षुः श्रोत्रं त्वगिह रसनं घ्राणमपि यत् ।
समालिङ्ग्यानन्दं प्रतिपदमुपैत्वप्रतिहतं,
तथा पञ्चान्यानि, स्मरहर विनैकां प्रियतमाम् ॥४६॥

मुमुक्षुर्योगेच्छुः स्पृहयतु विचार्यं प्रियतमां,
ततस्तां गृह्णातु, स्मरहर स युज्येत च तया ।
सहायोऽस्याभ्यासे भवति गुरुरेका प्रियतमा,
ययाऽऽकृष्टं चेतः पदमपि न शक्नोति चलितुम् ॥४७॥



स्थिरीभूतं चित्तं विषयविमुखं यत्करुणया
तयाऽऽत्मन्याधातुं कुशलमतिरीहेत शनकैः ।
ततोऽन्तः स्वानन्दं बहिरथ तदानन्दमनिशं
नयज्जीवन्मुक्तो विहरतु विवेकीह गिरिजे ॥४८॥

न संयोगे योगो, विषयसुवियोगे हि भवति,
प्रभुः शम्भोऽस्त्येका विषयविनिवृत्तौ प्रियतमा ।
अथैतस्याश्चित्तं कथमपि समाकृष्य मतिमान्,
शनैरात्मन्यस्तं नयतु, सुगमैषा हि सरणिः ॥४९॥

वदन्त्वन्ये दोषं विजहतु बलाच्च प्रियतमां,
महारण्ये देहो वसतु तप एवाचरतु वा ।
क्व योगाशा भ्रान्त्याऽपि भवति विना बाह्यतपसां
विरक्तम्मन्यानां भवति विनिपातः प्रतिपदम् ॥५०॥

प्रियाः सन्त्वन्येऽपि, प्रियतमसमाख्या न सुलभा,
विना क्वाहम्बुद्ध्या प्रियतमसमाख्येह भवति ।
यतोऽन्यस्मिन्क्वापि त्रिनयन न हि प्रीतिरधिका,
स एवार्थः शम्भो प्रियतमसमाख्यां सुलभते ॥५१॥

गुणाभावादन्तर्विलसति सदानन्द वपुषा
समस्मिन्संसारे प्रतिपलमिदन्त्वेन विषयः ।
स एवात्मा शम्भो त्वमसि बहिरेषा प्रियतमा
न किं द्वैतं मिथ्या प्रियतम ममाभाति सुदृशा ॥५२॥

वदन्मिथ्या स्वप्नं कथमपि शयानः स्वरचिताद्
बिभीयान्न व्याघ्रादविहतकृताभ्यासविभवः ।
तथा जाग्रद्देहं मृतिमभिमुखं चीत्कृतिपरं
न भुञ्जानाद्ध्विस्रान्निजमृतिमवेक्षेत सुकविः ॥५३॥

अहम्ब्रह्मास्म्येकं, जगदनृतमात्माहमपरं,
विदेहैका मुक्तिर्भवति चितिसाक्षात्कृतिफलम् ।
परा जीवन्मुक्तिः प्रतिपलचिदात्मस्थितिबलाद्,
द्विधा ज्ञानं द्वेधा फलमपि तदीयं पशुपते ॥५४॥

महात्मा संसारे पशुपतिरिवाभाति सुदृशां
तथैव व्यामोहग्रसनविकलीभूतमनसाम् ।
त्वयोदन्ता शम्भो विलसति खलानामपि सदा,
प्रकारांशे मूढान्महत इह पश्यन्ति कुदृशः ॥५५॥

अयं स्वप्नो, जाग्रद्भ्रम इह निवृत्तः पशुपते,
परं नायं भावो हरति मम भावान्तरमये ।
अतो जाग्रत्स्वप्नो भवति बत मोहाय गिरिजे,
विना त्वामालम्बे कथय कतमं भावमधुना ॥५६॥

त्वमेवैका मातर्जगति शरणं, वा पशुपति-
र्न विद्या, नाचार्यस्त्वयि हर न योगोऽपि विमुखे ।
त्वमाचार्यो, विद्या त्वमसि, मम योगोऽपि न परो,
भवन्तं ह्यालम्बे, भवतु भुवि भावोऽपि कतमः ॥५७॥

न किं मातापित्रोर्भवति धनभागीह तनय-
स्त्वदीया किं विद्या कथय न मदीया पशुपते ।
वृथाऽभ्यस्ता विद्या, धनमपि वृथैवार्जितमये,
युवां तद् गृह्णीतं हरतमथ चौरान्मम भयम् ॥५८॥

अहङ्कारः शम्भोऽपहरति मदीयं तव धनं,
विना चीत्कारं मे किमपि न हि शक्यं पशुपते ।
न चेज्जागर्षि त्वं, हरतु निखिलं तावकधनं,
कुतो न स्यां नग्नो, भवतु बत भूषेह भसितम् ॥५९॥



कुतः शेषे मातस्तव तु न हि भूषाऽस्ति भसितं,
गणेशो जागर्तु, प्रहरतु च चौरं हृतधनम् ।
गृहीत्वा सर्वस्वं क्वचिदपि दधातु स्वयमयं,
ददात्वल्पं मह्यं प्रतिदिनमवेक्ष्यैव समयम् ॥६०॥

व्रतित्वं गार्हस्थ्यं गिरिश वनवासित्वमथ वा
यतित्वं स्वीयेऽस्मिन्कथय कतमन्नाथ मनुषे ।
कुतो वा पातित्यं प्रतिपदमवेक्ष्याश्रमवृषाद्
दयालो नाद्यापि प्रकटयसि दीने मयि दयाम् ॥६१

व्रतित्वं विद्यायै भवति, वनवासस्तु तपसे,
परं नित्यं भ्रान्त्या विरतिसुखलाभाय, विदुषाम् ।
गृहित्वं सर्वस्मै प्रकृतिभिदया भाति गिरिजे,
प्रमाणं त्वं मातर्मदनुभवसाक्षी पशुपतिः ॥६२॥

उषो विद्यादानं, रहसि भजनं त्वच्चरणयो-
र्निरुद्वेगस्थित्या जगदसदिदं ब्रह्म मननम् ।
अहं मन्ये शम्भो, भवति मन एवाश्रमि सतां
न चिह्नं, देहस्थं कथयति महानाश्रममये ॥६३॥

यदन्तःस्थं चिह्नं, तदिह परबुद्धेरविषयः
परेषां कल्याणं, प्रभवति न कर्त्तुं कथमपि ।
अतो बाह्यं चिह्नं परिदधति सन्तोऽपि सततं,
न चेन्मर्यादायाः स्थितिरपि विलीयेत सहसा ॥६४॥

विनाऽन्तःऽस्थं चिह्नं प्रभवति न बाह्यं स्वपरयो-
र्विधातुं कल्याणं भवति स हि दम्भः पशुपते ।
अपि क्रोधो दम्भो भवतु मम, मात्सर्यमथ वा,
न भूयान्मे लोभः क्व चिदपि न मोहोऽपि गिरिजे ॥६५॥

विवेके वैराग्यं, भवति च विरागे ह्युपरति-
स्तया जीवन्मुक्तो गणपति न संसारजलधिम् ।
परं यावन्मिथ्या जगदिति दृढाभ्यास उदियान्-
न तावत्स्वाधीनं कथमपि भवेन्मामकमनः ॥६६॥

विनाभ्यासं शम्भो कथमिह निवर्त्तेत सुदृढः
पुराणः संस्कारः प्रतिपदमहं दीन इति यः ?
कथं कर्त्तुं शक्यो भवतु स च सत्याधिपटले,
विना त्वां संसारे कथय शरणं कः पशुपते ॥६७॥

विषीदन्नालम्ब्य प्रतिपदमिदानीमपि पदं
त्वदीयं संसारात्कथमपि शिवावामि हृदयम् ।
त्वदाशासम्बद्धस्तदपि हर बध्नामि सहसा,
कियन्तं नैराश्यं समयमुदियान्नो पशुपते ॥६८॥

विवेकं हेतुत्वं कथयतु विरागम्प्रति जनो
न तत्साक्षात्कारो भवति सुलभः सूरिभिरपि ।
इदानीं पश्यामि त्रिजगदपि दुःखैकशरणं,
विना मोहं प्रीतिर्भवतु कथमस्मिन्पशुपते ॥६९॥

अहं, बुद्धिश्चित्तं, मन, इह तथा, बाह्यकरणं,
वपुर्माता, तातस्तनय उत शम्भो प्रियतमा ।
धनं विद्या, मित्रं, किमपि न विभाति प्रियतमे,
कुतः स्यादासक्तिर्भवतु सुविहारः प्रतिपदम् ॥७०॥

अनासक्तिर्मुक्तिर्मनस इह बन्धो न वपुषः
सुखेच्छा ह्यासक्तौ भवति हर हेतुर्न रमणी ।
पिपासायाः शान्त्यै भवति यदि नीरं प्रियतमं,
कुतः कामोद्वेगप्रशमनकृते स्यान्न रमणी ॥७१॥



मनश्चक्षुः, श्रोत्रं, त्वगपि, रसनं, घ्राणमपरं
चिरात्स्वार्थालाभे व्यथयति बलाच्चेत्पशुपते ।
कुतो वा नोपस्थो व्यथयतु तदानीं, कथय मां,
न पण्डित्यं क्वापि त्रिजगति समीक्षे त्वदधिकम् ॥७२॥

विरागः स्त्रीत्यागो, गिरिश परमान्नाशनरुचि-
र्मठाख्यः प्रासादो, भवतु, समपेक्षाऽपि यशसः ।
परं नैनं याचे, जयतु मम रागः पशुपते
त्वदीयस्त्वद्भक्तो न तपति विपद्य प्रतिपदम् ॥७३॥

निरोद्धुं ये शक्ताः स्वमिह न भवन्त्यल्पसुखतः
कथंकारं ते स्युर्विषयसुखराशेरनुगमान् ।
इति प्राज्ञाः शम्भो कथमपि विरागाय निखिलं
स्त्रिया निन्दन्त्यङ्गं, कथमथ तथा पश्यतु सुधीः ॥७४॥

प्रभूतं स्वं रेतो दहति हर कामाग्निशिखया,
तथैतत्संक्षीणं हरति खलु सारं स्ववपुषः ।
विचार्यैतत्प्राज्ञो गिरिश न जहाति प्रियतमां,
विना जीवन्मुक्तो न भवति स जीवन्मृत इमाम् ॥७५॥

शनैर्दायं दायं विषयसुखमेभ्यः प्रयततां
प्रसादे ह्येतेषां भवति विजयः स्वस्वविषयात् ।
सुरापायी त्यक्तुं कथमपि न शक्नोति सहसा,
सुरापानं, किन्तु प्रचुरदिवसैरेव शनकैः ॥७६॥

मनश्चक्षुःपाणिप्रभृतिकरणानां स्वविषयान्
विना स्थातुं शक्तौ कथमपि भवेत्तद्विमुखता ।
ततः कार्या योग्ये सति समययात्माभिमुखता
ततोऽप्यात्मानन्दे प्रतिफलति सत्येव सुखिता ॥७७॥

कृते दीर्घेऽभ्यासे, सुदृढतमसंस्कार उदिते,
भ्रमीये संस्कारे क्षयमुपगते, त्वत्करुणया।
समाकृष्यैकान्ते करणमुपविश्य क्व चिदपि,
प्रपद्य स्वानन्दं विहरतु गृहे वा स विपिने ॥७८॥

रमण्या संसक्ते मनसि विपिनस्थेऽपि वपुषि,
स्मरः साक्षात्कारं जनयति रमण्याः सुतपसः।
रमण्या संसक्ते वपुषि रहसि स्वस्थमनसि
त्वमेवात्माऽऽनन्दः प्रतिफलसि शम्भो विहरतः ॥७९॥

गताः सप्तत्रिंशज्जननसमयादम्ब शरदो,
न जाने गार्हस्थ्यं भवति ननु कीदृक् सुकृतिनाम्।
अहो मां धिग्यस्य क्व चिदपि न भाति प्रियतमा,
कथङ्कारं शेषे, घटयसि न शम्भुप्रियतमे ॥८०॥

विरक्तं वा चित्तं भवतु मम शम्भो, तव पदं
प्रपद्यैतत् क्वापि स्मरतु न कदाऽपीह किमपि।
उताहो निर्भीतं विचरतु समे वाऽतिविषमे,
न तत्रत्यं दुःखं गणयतु कदाऽपीश हृदयम् ॥८१॥

इयान् कालो यातो, गणयसि न शम्भो किमिति भो-
रुपेक्षाऽर्हत्येषा कथय किमु दीने प्रतिपदम्।
त्वदाज्ञप्ता माता स्वयमिह चिरात् किं मृगयते
रमां वा रामां वाऽऽश्वसिहि मम चेतः सुखि भवेः ॥८२॥

त्वरा ह्रासे हेतुर्भवति, सुसमृद्धौ तु विदितो
विलम्बः पर्याप्तः, श्वसिषि न कथङ्कारमधुना।
मनस्त्वां नैवार्त्तं पशुपतिरुपेक्षेत, समयं
प्रतीक्षेत स्वामी, किमिह भव भक्त्या न लभते ॥८३॥



ममायं संतापो भवति हि कलङ्कस्तव, यतः
समर्था निन्द्यन्ते, क्व चिदपि न दीनाः कथमपि।
द्वितीयोऽयं तापो गरलमपि जेतुं प्रयतते,
त्वदीयोपेक्षाया भवति फलभागी तव जनः ॥८४॥

गतेऽस्मिन्नाषाढे, बत मदभिलाषे प्रतिहते,
कया नावा स्वामिन्नु जगदपवादार्णवगतम्।
निनीषस्यात्मानं कथय, परपारं कथमये,
कथं वेमां चिन्तां मम सुशमयेस्त्वं पशुपते ॥८५॥

प्रतिष्ठायाः पारं परमुपगतस्त्वं न गणयेः
प्रतिष्ठाप्रध्वंसं, गणयति न माताऽपि किमहो।
उपेक्षेथा मातः प्रतिपदमुपेतं यदि सुतं,
न कल्याणं पश्येः पशुपतिमनोहारिणि पुनः ॥८६॥

समर्था ह्रीक्ष्यन्ते स्वपरिचरणाशक्तकरणा,
महान्तः सीदन्ति स्मरहर न नीचाः कथमपि।
त्वदीयत्वादन्यत् त्रिजगति महत्त्वं किमधिकं,
त्वदीयोऽहं नान्यः, शपथमपि कुर्वे तव पुरः ॥८७॥

न यावत्सर्वस्वं भवति तदधीनं पितुरये,
न तावन्निर्वाहो भवितुमलमाभाति गिरिजे।
कथंकारं मातः स्वपिषि, न विजाने तव मतं,
परीक्षायाः कालः परिमित उताहोऽम्ब बहुलः ॥८८॥

कदा द्रक्ष्याम्यम्ब त्वदनुगुणशीलां तव वधूं,
निधाय स्वं भारं निखिलमिह तस्यां, सह तया।
द्वितीयं संसाध्याश्रममयि समाराध्य भवतीं,
विलीय स्वं स्वान्तं, परमुदमवाप्स्यामि च कथम् ॥८९॥

बलान्मोहं मोहं प्रविशति मनोजो मनसि मे,
बलाद्योधं योधं कथमपि जयामीश तमहम् ।
बलात्तोदं तोदं हरति स विवेकं पुनरये,
बलाद् ग्राहं ग्राहं कथमपि विवेकं हृदि दधे ॥९०॥

कियन्तं योत्स्येऽहं समयमशरीरेण रिपुणा-
ऽनवश्यम्भावित्वं विजय इह कस्यास्ति न मतम् ।
सहाये सम्पन्ने स्मरहर न कामं विजयिनं,
समीक्षिष्ये, कोऽयं भवति हृदयस्थे मम पुरः ॥९१॥

स्वयम्पाके पापं, स्वपरिचरणेऽदभ्रसमयं,
स्वगृह्ये कर्त्तव्ये त्रिपुरहर साक्षित्वमखिलम् ।
सदाऽऽशङ्कि स्वान्तं, मम विपदमद्यापि न कथं,
हरस्येषा चिन्ताऽपहरति विवेकं मितमपि ॥९२॥

इयं विद्या श्रीमद्गुरुचरणपाथोजमहिमा
मनस्त्रायं त्रायं भवति हि शरण्या पशुपते ।
कथं कामं कामं व्यजयत पिनाकीति गलितो,
मदीयः सन्देहो निवस मम चित्ते हि सततम् ॥९३॥

अनात्मत्वं मिथ्याऽसदचितिजडत्वं भवतु वा,
ऽथवाऽनिर्वाच्यत्वं, भ्रमविषयता, वा परिणतिः ।
पशुर्वा, जीवो वा, पशुपतिरुतात्मा प्रियतम—
स्त्वमेवासि स्वामिन्ननुभव उताहोऽनुभविता ॥९४॥

इतोऽन्यत्त्वद्रूपं प्रविशति न चित्ते स्थिरतया,
चितिः सर्वं कर्त्तुं क्षमत इति सम्भावितमतः ।
भवान्या कैलासे विहरसि यथैवं विहर मत्-
पुरस्तात्त्वं, दृश्यो भव हर, मया प्रार्थ्यत इति ॥९५॥



निगूढोऽन्तर्भावो गुरुवरपदाब्जादधिगतः
पवित्रे हि स्वान्ते प्रविशति मनो हीश्वर इति ।
अविद्या जीवत्वं, मनसि परविद्याऽस्ति हि परं,
परा विद्या भेदाधिगमकृतसंस्कारविलयः ॥९६॥

यथाऽसंख्यं जीवं जनयति मनः स्वप्नसमये
क्व चित्स्वे चेशत्वं, भवति न कथं जाग्रति तथा ।
त्वमेवैतत्सर्वं जनयसि च पासीश, हरसि,
प्रकृत्या, जानामि प्रकृतिपरतन्त्रं जगदिदम् ॥९७॥

त्वमेवाहं स्वामिन्नहमसि, तथाऽप्यम्ब भवतोः
पदं ध्यायं ध्यायं त्रिनयन दिदृक्षे प्रतिपदम् ।
सकालो नायातो, भवतु कथमीक्षाऽनवसरे,
न जानेऽसौ कीदृक्, कथय बत मातस्त्वमधुना ॥९८॥

मया कर्त्तुं शक्यं किमपि न विभातीह भगवं-
स्त्वयैवेदं कार्यं कृतमपि विना येन विफलम् ।
निरालम्बालम्बस्त्रिजगति शरण्यः पशुपते
त्वदन्यो नैवास्ति, त्रिपुरहर जह्याधिपटलम् ॥९९॥

प्रमाणादाधिक्येऽमृतमपि भवत्येव गरलं,
कथं यावज्जीवं विपदि हृदि धैर्यं वसतु मे ।
भवानि त्वां वन्दे, स्तुतिरियमपूर्येव भवतोः,
गृहस्थानां तापं शमयतु शिवोपेन्द्रशतकम् ॥१००॥

इति श्रीमत्परमहंसानन्तराममिश्रशिष्योपेन्द्रदत्तशर्मभावना-
विलासशतकम् ।

॥ सं० १९५५ ज्ये० कृ० ४ बृ० ॥

★

# फार्म-४

नियमः ८ द्रष्टव्यः

| | | | |
|---|---|---|---|
| १ | प्रकाशनस्थानम् | : | आरा ( विहारः ) |
| २ | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| ३ | मुद्रकस्य नाम | : | डा० गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केत | : | संस्कृतप्रसारपरिषद्, आरा |
| ४ | प्रकाशकस्य नाम | : | डा० गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा ( विहारः ) |
| ५ | सम्पादकस्य नाम | : | डा० गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः ? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा ( विहारः ) |
| ६ | तेषां जनानां नामानि सङ्केतश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम प्रकाशपुरी, आरा ( विहारः ) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि तत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति ।

ह० गोपबन्धु मिश्रः

सम्पादकः

मार्च 2000

आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

आर० एन० आई० सं० 58951/94